Ajita Prabhācārya
Shāntināthacaritram

UNIVERSITY OF TORONTO DUPL
3 1761 00382024 8

BL
1373
S45A6
1909
v.4



UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

BIBLIOTHECA INDICA:
A
A COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO. 1393.

श्रीशान्तिनाथचरित्रम् ।



ÇRĪ ÇĀNTINĀTHA CARITRA,

OR A BIOGRAPHY OF ÇĀNTINĀTHA

BY

ÇRĪ AJITA PRABHĀCĀRYA.

EDITED BY

UPADHYAYA ÇRI INDRAVIJAYA

DISCIPLE OF

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS IV.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1914.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, Mr. BERNARD QUARITCH, 11, Grafton Street, New Bond Street, London, W., and Mr. Otto HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	Rs.	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
Amarkosha Fasc. 1		2	0
Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	8
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-		1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3	12
Atmatattaviveka, Fasc. I.		0	10
Açvavaidyaka, Fasc. 1-5 @ 10/ each		3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10 ; Vol. II. Fasc. 1-10 @ 1/ each		20	0
Bālam Bhaṭṭī, Vol. I. Fase 1-2, Vol II, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-5 @ /10/ each ...		5	0
Bhāsavritty		0	10
Bhāṭṭa Dipikā Vol. I. Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...		4	6
Bauddhastotrasangraha		2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each		3	12
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ 10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I. Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. VI. Fasc. 1-3 @ 1/4/ each		3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	2
Ditto Vol. IX. Fasc. 1-2		1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each		10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10 each ...		26	14
Ditto Vol. IV, Fasc. 7-8. @ 1/4 each		2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/		1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Çāṅkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 ; Vol 4. Fasc. 1 @ 10/ each		10	0
Çrī Bhāshyam, Fasc 1-3 @ 10/ each		1	14
Dāna Kriyā Kaumudī, Fasc 1-2 @ 10/ each		1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ 10/ each		4	6
Ditto Āchārasārah Vol. II. Fasc. 1-4 @ 10/ each		3	2
Gobhiliya Grihya Sutra, Vol I @ /10 each		3	2
Ditto Vol II. Fasc. -2 @ 1/4/ each		2	8
Ditto (Appendix) Gobhila Parisista		2	0
Ditto Grihya Sangraha		0	10
Haralata		1	14
Karmapradiph, Fasc. I		1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	6
Kātantra, Fasc 1-6 @ 12/ each		4	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		5	10
Kiranavali, Fasc. 1-2 @ /10/ each		1	4
Madana Pārijāta, Fasc. 1-11 @ /10/ each		6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol III, Fasc. 1-10 @ /10/ each		19	6
Ditto Vol. IV, fasc. 1 @ /4		2	8
Manuṭikā Sangraha, Fasc. 1-3 @ /10 each		1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each		9	0
*Mimāṁsā Darçana, Fasc. 10-19 @ 10/ each		6	4
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each		2	8

तस्यां पुर्यामयं कल्पः शाकिनीनां भयेन यत् ।
उद्घाट्यन्ते गोपुराणि भानुमत्युदिते सति ॥ ३५ ॥
वत्सराजस्ततो दध्यौ पुर्य्या बाह्यगृहेषु न ।
वसनीयं यतो गन्तुः शक्यो रोद्धुं न चान्दनः ॥ ३६ ॥
क्व गम्येयं मया रात्रिः शीते पतति दारुणे ? ।
हुं ज्ञातं वा तत्र देवकुलिकायां व्रजाम्यहम् ॥ ३७ ॥
इति ध्यात्वा द्रुतं तत्र गत्वा चैकत्र पादपे ।
कावाकृतिं चावलम्ब्याऽविशद्देवकुलान्तरे ॥ ३८ ॥
तत्कपाटे पिधायाऽथ मुक्त्वा पार्श्वे कुठारिकाम् ।
तत्रैकदेशे सुष्वाप निर्भयो वीरसेनजः ॥ ३९ ॥
अत्रान्तरे च संजातं रात्रिमध्ये यदद्भुतम् ।
वत्सस्य तस्थुषस्तत्र तदितः श्रूयतां जनाः ! ॥ ४० ॥
अतिरम्यविमानस्थो वैताढ्यवरपर्वतात् ।
समाययौ खेचरीणां सार्थोऽस्मिन् यत्तमन्दिरे ॥ ४१ ॥
विहितस्कारशृङ्गारा गीतनृत्यसमुद्यताः ।
तद्दाक्षमण्डपगता जल्पन्ति स्मेति ता मिथः ॥ ४२ ॥
चित्रलेखे ! प्रवीणे ! त्वं वीणां वादय सुन्दराम् ।
'हले ! मदनिके ! तालावादनं त्वं पुनः कुरु ॥ ४३ ॥
पटिष्ठे ! पटहं सज्जं विधेहि वेगवत् परम् ।
मृदङ्गमङ्ग प्रगुणं क्षिप्रं पवनिके ! तनु ॥ ४४ ॥

(१) ङ ज ध हला ।

BL
1373
S45A6
1909
V.4.

गाय गान्धर्विके ! गीतं नृत्यं कुर्मो वयं यतः ।
पूरयामो निजां स्वेच्छामिह स्थाने [1]मनोरमे ॥ ४५ ॥
एवं वदन्त्यस्तास्तत्र क्रीडन्ति स्म यथासुखम् ।
हासतोषपरवशा महाविस्मयकारिकाः ॥ ४६ ॥
ततः स्वेदजलार्द्राणि मुक्तादायाऽम्बराणि ताः ।
क्षणमेकं च विश्रम्य स्वस्थानं प्रस्थिताः पुनः ॥ ४७ ॥
वत्सराजकुमारोऽपि कुड्यिकाविवरेण तत् ।
व्यलोकयत् कौतुकेन सर्वं तासां विचेष्टितम् ॥ ४८ ॥
तत्रैव विस्मृतं तासां भक्तिचित्रं सुकञ्चुकम् ।
ददर्श चैकं रत्नौघमण्डितं तं महाद्युतिम् ॥ ४९ ॥
अथोद्घाट्य कपाटे तं गृहीत्वा वरकञ्चुकम् ।
प्रविवेश झटित्येव पुनर्देवकुलान्तरे ॥ ५० ॥
मध्ये तासां खेचरीणां स्मृत्वोचेऽथ प्रभावती ।
महामूल्यो वारवाणस्तत्र मे विस्मृतो हला ! ॥ ५१ ॥
ततस्ताभिरभाणीयं वेगवत्या समन्विता ।
गत्वा त्वं सत्वरं तत्रानय तं निजकञ्चुकम् ॥ ५२ ॥
इत्युक्ता सा ययौ शीघ्रं स्थाने नैश्चिष्ट तत्र तम् ।
जजल्प च गतः क्वाऽयमित्यत्या सखि ! वेलया ॥ ५३ ॥
स्थानं निर्मानुषं चैतत् त्रियामा च त्रियामिता ।
ततः संभाव्यते नाऽस्य ग्राहकः कोऽपि निश्चितम् ॥ ५४ ॥

---

(१) ङ मनोहरे ।

वेगवत्यवदद्दूरं नीतो नूनं स वायुना ।
ततः प्रमादमुत्सृज्य निरीक्षावोऽत्र सर्वतः ॥ ५५ ॥
अथावलोकयन्तीभ्यां ताभ्यामेषा विहङ्गिका ।
दृष्टाऽवलम्बिता वृक्षेऽन्योन्यमेवमभाणि च ॥ ५६ ॥
अस्य देवकुलस्यान्तर्गूढः कोऽप्यस्ति पूरुषः ।
[1]कूर्पासहर्ता, तदमुं भीषयावः कथञ्चन ॥ ५७ ॥
इत्यूचतुश्च मध्यात्त्वमरे ! मानुष ! निस्सर ।
मुञ्च नौ कञ्चुकं नो चेद्वरिष्यावः शिरस्तव ॥ ५८ ॥
एवमुक्तोऽप्यसौ ताभ्यां क्षत्रियत्वाद् बिभाय न ।
उद्घाटयामासतुस्ते भिया यक्षस्य नाररी ॥ ५९ ॥
मन्त्रयाञ्चक्रतुश्चापसृत्य ते योऽत्र कश्चन ।
उषितोऽभिजनस्तस्य रुदिष्यति पुरान्तरे ॥ ६० ॥
तत्र गत्वा ततश्चावां जानीवोऽस्याभिधादिकम् ।
मन्त्रयित्वेति खेचर्यौ जग्मतुस्तच्च ते द्रुतम् ॥ ६१ ॥
धारिणीविमले तावन्महादुःखाभिपीडिते ।
मुहुर्विलपतः स्मैवं स्मारं स्मारं स्वनन्दनम् ॥ ६२ ॥
हा ! वीरसेनभूपालप्रसूत ! सुखलालित ! ।
वत्सराज ! कुमाराऽभूर्दृश्या कीदृशी तव ? ॥ ६३ ॥

---

(१) ङ कञ्चुकहर्ता ।

राज्यापहारः प्रथमं देशान्तरगतिस्ततः ।
परवेश्मनिवासश्च तथा कष्टेन भोजनम् ॥ ६४ ॥
हा वत्स ! प्रेषितोऽस्यद्य त्वमिन्धनकृते कथम् ? ।
आवकाभ्यामधन्याभ्यां यदद्याऽपि समेषि न ॥ ६५ ॥
तच्छ्रुत्वा ज्ञातवृत्तान्ते ते खेचर्य्यावुपेयतुः ।
तत्र देवकुले मातस्वरेणैवं जजल्पतुः ॥ ६६ ॥
त्वद्वियोगार्दिते आवामिहायाते कथञ्चन ।
हा वत्स ! राजवत्स ! त्वमात्मानं नौ प्रदर्शय ॥ ६७ ॥
सोऽथ दध्यौ जनन्योर्मे नाऽऽगतिर्घटतेऽधुना ।
तन्नूनमेते ते एव खेचर्य्यौ मायया ऽऽहृते ॥ ६८ ॥
ध्यात्वेति प्रददौ धीमान् वाङ्मात्रमपि नैतयोः ।
उदिते च रवावेते खिन्ने स्वस्थानमीयतुः ॥ ६९ ॥
कुड्यिकाविवरेणान्तःप्रविष्टा रविरोचिषः ।
विलोक्य निर्ययौ देवकुलमध्यात्कुठारिकः ॥ ७० ॥
कञ्चुकं स्थगयित्वा तं श्रीखण्डतरुकोटरे ।
कावाकृतिं गृहीत्वा च काष्ठं कृत्वा परं करे ॥ ७१ ॥
चचाल गेहाऽभिमुखं पुरद्वारगतोऽथ सः ।
चिक्षेप काष्ठखण्डं तत्प्रतोलीपालकस्य च ॥ ७२ ॥ (युग्मम्)
यातः परिमलस्तस्योच्छलति स्म स चान्दनः ।
ततोऽवलोकयामास दिङ्मुखान्यखिलो जनः ॥ ७३ ॥
कुतः स्फुरति गन्धोऽयमित्यन्योन्यं जजल्प च ? ।
तमेधोवाहक इति हीलया पश्यति स्म सः ॥ ७४ ॥

गत्वा स्वगेहे तन्मध्ये गोपयामास [1]सोऽथ तत् ।
आर्पयत् खण्डमेकं च निजमातृष्वसुः करे ॥ ७५ ॥
तया तदनुमत्या तद्विक्रीतं गन्धिकापणे ।
तन्मूल्यद्रव्यमानीय प्रचुरं चास्य दर्शितम् ॥ ७६ ॥
सोऽथ प्रोवाच हे अम्ब ! मा कार्षीः कर्म गर्हितम् ।
अस्मिंश्च निष्ठिते खण्डे विक्रेतव्यमथाऽपरम् ॥ ७७ ॥
दातव्यं श्रेष्ठिनो गेहभाटकं च यथोचितम् ।
विधेयं स्वं पराधीनं भवतीभ्यां न कस्यचित् ॥ ७८ ॥
अहं तु स्वेच्छयाऽवश्यं क्रीडिष्याम्यखिलं दिनम् ।
गेहेऽत्र शयितुं रात्रावागमिष्यामि सर्वदा ॥ ७९ ॥
इत्युदित्वा कुमाराणां समीपेऽथ ययावसौ ।
तैरूचे ह्यस्तनदिने न भ्रातः ! किमिहागतः ? ॥ ८० ॥
शरीरापाटवं किञ्चिन्ममासीदिति सोऽब्रवीत् ।
तेऽवदन् सदनं ते न विघ्नोऽभ्येमोऽन्यथाऽन्तिकम् ॥ ८१ ॥
जगाद तमुपाध्यायो वत्स ! ते कतमत् कुलम् ? ।
कस्मातो जननी का वा जन्मभूमिश्च का ननु ? ॥ ८२ ॥
भणति स्म कुमारोऽदस्तात ! मा पृच्छ सम्प्रति ।
प्रस्तावे तत्पुनः सर्वं कथयिष्यामि ते ध्रुवम् ॥ ८३ ॥
ज्ञात्वा तद्भावमाकारसंवरं चक्रिरेऽथ ते ।
कुमारा ददिरे चास्मै भोजनाच्छादनादिकम् ॥ ८४ ॥

---

(१) ज ध सोऽपि ।

अथान्येद्युरुपाध्यायो गृहीत्वा तान् कुमारकान् ।
वत्सराजं [1]समाकार्य समीपे भूपतेर्ययौ ॥ ८५ ॥
प्रणिपातं विधायास्य निषेदुस्ते यथोचितम् ।
वत्सराजकुमारं च दृष्ट्वा पप्रच्छ तान्नृपः ॥ ८६ ॥
को नु वत्साः ! कुमारोऽयं दृश्यते युष्मदन्तिके ? ।
प्रतिपन्नसगर्भोऽयमस्माकमिति तेऽब्रुवन् ॥ ८७ ॥
ततः पृष्टोऽमुनाऽऽचार्यो भद्रायं कस्य नन्दनः ? ।
विज्ञानं कीदृशं वाऽस्येत्युक्तः सोऽवोचदज्ञसा ? ॥ ८८ ॥
राजन्नस्य कुमारस्य सम्यग् जानामि नान्वयम् ।
विज्ञानेन पुनः पृथ्व्यां तुल्यो नास्त्यस्य कश्चन ॥ ८९ ॥
अथो राज्ञः कुमारैस्तैः स्वविज्ञाने प्रदर्शिते ।
वत्सराजोऽपि तत्तस्य सविशेषमदर्शयत् ॥ ९० ॥
हृष्टो राजाऽवदद्वत्स ! शंस गोत्रं निजं मम ।
स्थगितानां मौक्तिकानां नार्घो विज्ञायते यतः ॥ ९१ ॥
विज्ञायाऽवसरं तेन सकलाऽपि निजा कथा ।
मूलादारभ्य निःशङ्कमाचचक्षेऽस्य सूनृता ॥ ९२ ॥
ततो राज्ञः समीपस्था कमलश्रीति वल्लभा ।
मातृष्वसा कुमारस्य तच्छ्रुत्वोचे ससम्भ्रमम् ॥ ९३ ॥
हे वत्स ! किमिहायाते धारिणीविमले अपि ? ।
आमेति भणिते तेन सोवाच जगतीपतिम् ॥ ९४ ॥

---

(१) ङ सहाकार्य ।

प्राणेश ! मम यामी ते पूर्वजे तत्त्ववाञ्चया ।
मिलनाय तयोर्यामीत्युक्ते सा भणिताऽमुना ॥ ८५ ॥
याहि देवि ! भगिन्यौ ते कुमारेण समन्विते ।
इहानय यतस्तत्र वर्तेते ते सुदुःखिते ॥ ८६ ॥
करेणुकासमारूढा परिवारसमन्विता ।
धृतच्छत्राऽथ सा यावच्छ्रेष्ठिनः सदनं गता ॥ ८७ ॥
श्रेष्ठी ससम्भ्रमस्तावदुपचारमनेकशः ।
कर्तुं प्रवृत्तोऽलमिति तयैव हि निवारितः ॥८८॥ (युग्मम्)
धारिणीविमलानाम्नोस्तयोर्नत्वा क्रमानथ ।
कथयित्वाऽऽत्मनो वार्तां वत्सराजोऽभ्यधादिदम् ॥ ८९ ॥
इहाऽस्ति भूपतिर्योऽसौ युवयोर्भगिनीपतिः ।
संप्राप्ता भगिनी सा वा मिलनाय गृहाजिरे ॥ ५०० ॥
जानीवोऽदः परं ह्यात्मा क्रिया वत्सक ! गोपितः ।
इत्युक्तवन्त्यौ ते हर्षाद् निःसृते मन्दिराद्बहिः ॥ १ ॥
करेणुकाया उत्तीर्य लगित्वा कण्ठकन्दले ।
भगिन्योः कमलश्रीः सा रुदत्येवमभाषत ॥ २ ॥
हा ! जाता दारुणावस्था युवयोः कथमीदृशी ? ।
दोषोऽथवा विधेरेव यत् सतां विपदागमः ॥ ३ ॥
इहागताभ्यामप्यात्मा युवाभ्यां किं निगूहितः ? ।
संप्राप्ते व्यसने दैवात् का त्रपा शुभकर्मणाम् ? ॥ ४ ॥
अथवाऽहमधन्यैव वसन्त्यौ नगरे निजे ।
स्वसारौ न यया ज्ञाते पुत्ररत्नान्विते अपि ॥ ५ ॥

इदानीं किं वल्गुनेनाध्यारुह्य करिणीमिमाम् ।
आगच्छतं ममावासे युवां पुत्रसमन्विते ॥ ६ ॥
अथासौ भणितस्ताभ्यां श्रेष्ठी यत्किञ्चिदप्रियम् ।
आवाभ्यां त्वद्गृहस्थाभ्यां कृतं तत् क्षम्यतामिति ॥ ७ ॥
युवां वणिक्स्वभावेन यद्गृहे कर्म गर्हितम् ।
कारिते मर्षितव्यं तदित्यूचे सोऽपि ते प्रति ॥ ८ ॥
अन्योऽन्यं क्षमयित्वैवं वत्सराजसमन्विते ।
जग्मतुस्ते नृपावासे भगिन्या उपरोधतः ॥ ९ ॥
प्रासादमर्पयित्वैकं सामग्रीसंयुतं तयोः ।
ऊचे राजा कुमारं तं वत्स ! किं ते ददाम्यहम् ? ॥१०॥
सोऽवदन्नापरं याचे सेवां कर्तास्मि ते सदा ।
दिनावसाने गेहे तु प्रेषितव्यः स्वयं त्वया ॥ ११ ॥
प्रतिपन्नमिदं राज्ञा सेवां तस्य चकार सः ।
चक्रे च तद्गृहं सुस्थं [1]राजा धान्यादिवसुभिः ॥ १२ ॥
अन्यदा मेदिनीपालः कथमप्यविसृज्य तम् ।
सुप्तो वासगृहे तत्र यामिकैः परिवेष्टितम् ॥ १३ ॥
वत्सराजकुमारोऽपि खड्गव्यग्रकरो बहिः ।
तस्थौ वासगृहस्याऽस्य विनीतो वरभृत्यवत् ॥ १४ ॥
[2]निशीथसमये जाते शुश्राव करुणस्वरम् ।
कस्याश्चिदतिदुःखिन्याः कामिन्या रुदितं नृपः ॥ १५ ॥

---

(१) च ज राज्ञा ।
(२) ख च ज निर्गीथे गतनिद्रोऽथ ।

आभाषितास्ततस्तेन सर्वे प्राहरिका नराः ।
ते तु प्रमाददोषेण सुप्ता नो ददिरे वचः ॥ १६ ॥
वत्सराजोऽवदत् स्वामिन् ! कार्यमादिश्यतां मम ।
[1]राजोचे किं मया नाद्य विसृष्टोऽसि महाशय ! ॥ १७ ॥
आमेति भणिते तेन सोऽब्रवीदधुनाऽपि हि ।
विसृष्टोऽसि गृहं याहि प्रेष्यत्वं तव नोचितम् ॥ १८ ॥
सोऽवदत् त्वत्समादेशं कुर्वतः का मम त्रपा ? ।
अवश्यं तं करिष्यामि कार्यमादिश्यतां प्रभो ! ॥ १९ ॥
राजोचे तर्हि गत्वा त्वं पृष्ट्वा दुःखस्य कारणम् ।
[2]वत्सैनां कामिनीं दीनां रुदतीं प्रतिषेधय ॥ २० ॥
सोऽथ शब्दानुसारेण कृत्वा प्राकारलङ्घनम् ।
मध्यभागे श्मशानस्य ययौ सत्त्वसमन्वितः ॥ २१ ॥
तत्रैकदेशे सहस्रालङ्कारपरिशोभिताम् ।
विलोक्य[3] ललनामेकां रुदतीमित्यभाषत ॥ २२ ॥
का त्वं मुग्धे ! कथं चात्र श्मशाने हन्त ! रोदिषि ? ।
न चेन्नोप्यं तदाख्याहि निजं दुःखस्य कारणम् ॥ २३ ॥
साऽवोचच्चलितोऽसि त्वं यत्र तत्र प्रयाहि भोः ! ।
असमर्थतनोस्ते किमनया मम चिन्तया ? ॥ २४ ॥
वत्सोऽवादीद्दुःखिनीं त्वां दृष्ट्वा नो गन्तुमुत्सहे ।
भवन्ति साधवो यस्मात् परदुःखेन दुःखिताः ॥ २५ ॥

---

(१) ङ राज्ञोचे ।
(२) ङ च वत्सेमां । (३) ख ङ ज क्याथावत्सा- । द-क्य त्विवलया ।

साऽऽख्यदेवंविधाः सन्तो यदि तद्भवतोऽत्र किम् ? ।
तदा तैलस्य किं मूढ ! चेत् सुगन्धं भवेद् घृतम् ? ॥ २६ ॥
जजल्प वत्सराजस्तु कथं कुपुरुषस्त्वया ।
ज्ञातोऽहं, साऽवदद्येन दृश्यसे बालकाकृतिः ॥ २७ ॥
स पुनः स्माह किं सूरो हन्ति बालोऽपि नो तमः ? ।
तुङ्गमातङ्गपूगं वा किं न हन्याद् हरिः शिशुः ? ॥ २८ ॥
किं वा चिन्तामणिः स्वल्पः कुर्यान्न सकलेप्सितम् ।
एवं मय्यपि बालोऽयमित्यनास्थां विधेहि मा ॥ २९ ॥
स्मित्वाऽभाषिष्ट साऽप्येवं तर्हि भोः ! शृणु कारणम् ।
अत्रैव पुरि वास्तव्योत्तमपुंसो गृहिण्यहम् ॥ ३० ॥
विनाऽपराधमेतेन भूभुजा स तु मे पतिः ।
शूलिकायामिहाऽऽरोपि वर्तमानोऽपि यौवने ॥ ३१ ॥
सर्वदा भोजनविधाविष्टा एते यतोऽभवन् ।
अहं प्रत्येमुमिच्छामि घृतपूरान् मुखेऽस्य तत् ॥ ३२ ॥
एतत् कर्तुमशक्ताऽहमयमुच्चतरो यतः ।
तेन रोदिमि भर्तारं स्मृत्वा भर्तारमात्मनः ॥ ३३ ॥
भणिता वत्सराजेन सुभ्रु ! स्कन्धेऽधिरुह्य मे ।
समीहितं विधेहि स्वमित्युक्ता सा तथाऽकरोत् ॥ ३४ ॥
चखाद मांसखण्डानि कर्तित्वा सा दुराशया ।
स्कन्धदेशे कुमारस्य खण्डमेकमथाऽपतत् ॥ ३५ ॥
किमेतदिति सञ्चिन्त्य यावदूर्ध्वमलोकयत् ।
तावत्तच्चेष्टितं तस्याः स ददर्श चुकोप च ॥ ३६ ॥

खड्गमाकृष्य रे रण्डे ! प्रचण्डे ! किं करोष्यदः ? ।
इत्युक्ता वत्सराजेन सोत्पपात नभस्तले ॥ ३७ ॥
सोत्पतन्ती परिधानचीवरे जगृहेऽमुना ।
तद्विमुच्य करे तस्य क्षणात् काऽपि ययावसौ ॥ ३८ ॥
अत्रान्तरे घनस्थं जिनं प्रच्छ कश्चन ।
भगवन् ! कामिनी काऽसौ चक्रे कर्म किमीदृशम् ? ॥३९॥
भगवानप्यथोवाच सा पापा दुष्टदेवता ।
करोत्येवंविधं कर्म क्षलनार्थं नृणामहो ! ॥ ४० ॥
भूयः पृष्टोऽमुना स्वामी किं नु खादन्ति देवताः ।
मांसं, नेति जगादासौ क्रीडा तासामियं पुनः ॥ ४१ ॥
वत्सराजोऽथ तद्वस्त्रमादाय स्वगृहं गतः ।
तावच्छ्रयितवान् यावदुदियाय दिवाकरः ॥ ४२ ॥
ततस्तद्वस्त्रमादाय राज्ञः पार्श्वे ययावसौ ।
प्रणिपातं विधायाऽस्य निषसाद यथास्थिति ॥ ४३ ॥
पृष्टोऽथ रात्रिवृत्तान्तः प्रस्तावे जगतीभुजा ।
तेनाऽप्यस्य स निःशेषो यथा वृत्तो निवेदितः ॥ ४४ ॥
तद्देवतानिवसनमर्पितं च महीपतेः ।
वररत्नमण्डितं तु तद्दृष्ट्वा स विसिस्मिये ॥ ४५ ॥
राज्ञ्याः पार्श्वे निविष्टाया राज्ञा तद्वस्त्रमर्पितम् ।
तस्मिन् परिहिते तस्याः शोभते स्म न कञ्चुकः ॥ ४६ ॥
ततः सोचेऽमुना तुल्यो न कूर्पासः सुवाससा ।
यदि स्यादेष संयोगस्तदा प्राणेश ! सुन्दरम् ॥ ४७ ॥

ततो वृत्तान्तमाख्यायानीय तं वरकञ्चुकम् ।
वत्सराजकुमारोऽसावर्पयामास भूपतेः ॥ ४८ ॥
राजा समर्पयामास तं देव्याः साऽपि साञ्जसम् ।
सद्यः परिदधाति स्म प्रहृष्टवदनाम्बुजा ॥ ४९ ॥
तयोरननुरूपं चोत्तरीयं प्रेक्ष्य सा पुनः ।
कुरुते स्माऽधृतिं लोभो लाभे सति विवर्धते ॥ ५० ॥
राजा प्रोवाच हे देवि ! कञ्चुकेऽपि समर्पिते ।
किं त्वं श्यामसुखी साऽथ स्वाऽभिप्रायं शशंस तम् ॥ ५१ ॥
तच्छ्रुत्वा भूपतिर्दध्यावसन्तुष्टा अहो ! स्त्रियः ।
तृप्यन्ति न कदाप्येता वस्त्रालङ्करणादिषु ॥ ५२ ॥
ऊचे च लोभं हे देवि ! मा विधेहि निरर्थकम् ।
वस्तुनोऽविद्यमानस्य कृते त्वमविवेकिनि ! ॥ ५३ ॥
प्रच्छादनं यदा लप्से शाटिकाचोलयोः समम् ।
तदा भोक्ष्येऽहमित्युक्ता साऽविशत् कोपमन्दिरे ॥ ५४ ॥
ततो राज्ञा वत्सराजः प्रोक्तः साहसिक ! त्वया ।
दिव्यवस्त्रे समानीयाऽनर्थोऽयं विहितः खलु ॥ ५५ ॥
इमां मातृष्वसारं स्वां कथञ्चिदपि तोषय ।
त्वां विना नापरः कश्चिदस्य व्याधेश्चिकित्सकः ॥ ५६ ॥
प्रोक्ताऽपि तेन साऽमुञ्चत् स्त्रीस्वभावेन नाग्रहम् ।
ततो राज्ञः पुरश्चक्रे प्रतिज्ञेयं सुदुस्तरा ॥ ५७ ॥
देव्या समीहितं वस्त्रं षण्मासाऽभ्यन्तरे यदि ।
नानयामि ततो वह्नौ प्रविशामि न संशयः ॥ ५८ ॥

प्रोचेऽथ भूपतिर्भद्र ! प्रतिज्ञां मेदृशीं विधाः ।
सम्यक् कृतान्तपाशानां पातो न ज्ञायते यतः ॥ ५८ ॥
सोऽवदत् त्वत्प्रसादेन सर्वं साधु भविष्यति ।
किन्तु मां विसृज क्षिप्रं यामि देशान्तरं यतः ॥ ६० ॥
स्वहस्तगतताम्बूलं दत्त्वाऽसौ तेन साज्ञसम् ।
विसृष्टः स्वगृहे गत्वा जनन्यौस्तं न्यवेदयत् ॥ ६१ ॥
अनिच्छन्त्यपि तच्चित्ते पुत्रापायाऽभिशङ्किनी ।
भूयात् ते विजयो वत्सेत्यूचे सा दुष्टिशालिनी ॥ ६२ ॥
किञ्चित्पाथेयमादायोपानद्गूढपदद्वयः ।
खड्गखेटकसंयुक्तो नगर्या निर्ययावसौ ॥ ६३ ॥
दक्षिणां दिशमाश्रित्य बहुग्रामपुराकुलाम् ।
पश्यन् वसुमतीमेकामाससादाटवीमसौ ॥ ६४ ॥
तुङ्गप्राकारमद्राक्षीत् तत्रैकं लघुपत्तनम् ।
विलोक्य विजनं तच्च वत्सराजो व्यचिन्तयत् ॥ ६५ ॥
किमिदं हन्त ! भूतानां पुरं वा यक्षरक्षसाम् ।
अनया चिन्तया किं वा प्रविश्यालोकयाम्यहम् ॥ ६६ ॥
प्रविशंश्च ददर्शासौ तन्मध्ये तुङ्गमन्दिरम् ।
तत्पार्श्वे लघुगेहानि ततस्तत्र विवेश सः ॥ ६७ ॥
दृष्ट्वासनोपविष्टं च तत्रैकं पुरुषं वरम् ।
परिवारनरं तस्य वत्सः पप्रच्छ कञ्चन ॥ ६८ ॥
किंनामेदं पुरं भद्र ! किंनामाऽयं महीपतिः ।
सोऽवादीद् नगरं नैतद् न चायं पृथिवीपतिः ॥ ६९ ॥

किन्त्विती नातिदूरेऽस्ति पुरं भूतिलकाभिधम् ।
वैरिसिंहो नृपस्तत्र श्रेष्ठी दत्ताभिधस्तथा ॥ ७० ॥
श्रीदेवीनामधेयाया भार्यायाः कुक्षिसम्भवा ।
रूपलावण्यसंयुक्ता श्रीदत्ता तस्य नन्दिनी ॥ ७१ ॥
साऽभवद् यौवनप्राप्ता दोषग्रस्तशरीरका ।
तस्याः प्राहरिको रात्रौ यो भवेद् म्रियते हि सः ॥ ७२ ॥
यदि प्राहरिको नास्या भवेत् तत्तस्य पूरुषाः ।
विपद्यन्ते, ततो राज्ञा स श्रेष्ठ्यवं प्रजल्पितः ॥ ७३ ॥
श्रेष्ठिन् ! त्वं नगरं मुक्त्वा गच्छाटव्यां ममाज्ञया ।
त्वत्सुतादोषजनितः किल लोकक्षयोऽस्तु मा ॥ ७४ ॥
सोऽयं श्रेष्ठी समेतोऽत्र स्वपरीवारसंयुतः ।
चक्रे च चौररक्षार्थं सप्राकारमिदं गृहम् ॥ ७५ ॥
अनेन गोलकाबद्धाः कृता यामिकपूरुषाः ।
प्रभूतधनलोभेन ते च सत्यस्य सन्निधौ ॥ ७६ ॥
तेषां मध्यादथैकैको म्रियते च दिने दिने ।
तान् मुक्त्वा नापरः कश्चिदिह स्थाने वसत्यहो ! ॥ ७७ ॥
ततस्त्वमपि हे पान्थ ! याह्यन्यत्र बिभेषि चेत् ।
इति श्रुत्वा कुमारोऽपि ययौ दत्तस्य सन्निधौ ॥ ७८ ॥
दत्तोऽप्यासनमेतस्मै ससम्भ्रममदापयत् ।
ततस्तत्रोपविष्टाय ताम्बूलं प्रददौ स्वयम् ॥ ७९ ॥
पृच्छति स्मादरेणैवं वत्स ! त्वं कुत आगतः ? ।
सोऽथावादीदुज्जयिन्याः कारणेनाऽहमागतः ॥ ८० ॥

एवं यावज्जजल्पाऽसौ कुमारः श्रेष्ठिना सह ।
तत्रैकस्तावदायातः पुमान् शृङ्गारशोभितः ॥ ८१ ॥
विमनस्कममुं दृष्ट्वा कुमारः श्रेष्ठिनं प्रति ।
जगाद किमयं तात ! विच्छायो दृश्यते पुमान् ? ॥ ८२ ॥
ततो दीर्घं विनिःश्वस्य श्रेष्ठ्याचे तव सुन्दर ! ।
अत्यन्तगोपनीयोऽपि वृत्तान्तोऽयं [1]निवेद्यते ॥ ८३ ॥
अस्ति मे तनया तस्या रात्रौ यो यामिको भवेत् ।
अतिप्रचण्डदोषेण सोऽवश्यं वत्स ! हन्यते ॥ ८४ ॥
बभूव पुरुषस्याऽस्य यामिकत्वेऽद्य वारकः ।
तेनाऽयं विमना [2]मृत्योः कस्य वा न भयं भवेत् ? ॥ ८५ ॥
वत्सराजस्ततोऽवादीत् तिष्ठत्वेष यथासुखम् ।
अहमद्य भविष्यामि तस्याः प्राहरिको निशि ॥ ८६ ॥
श्रेष्ठी जगाद वत्स ! त्वमद्य प्राघुणको मम ।
भुक्तं च न त्वया किञ्चित् किमङ्गीकुरुषे मृतिम् ? ॥ ८७ ॥
वत्सराजोऽवदत् तात ! कार्यमेतन्मया [3]ध्रुवम् ।
परोपकाररसिकैर्यदिदं पठ्यते बुधैः ॥ ८८ ॥
कृतोपकारः सर्वोऽपि करोत्युपकृतिं जनः ।
विनोपकारं यस्त्राता विपदः, सोऽत्र सज्जनः ॥ ८९ ॥
आवासस्योपरितनभूमौ सोऽथ कुमारकः ।
आरोहति स्म यत्रासीत् श्रीदत्तश्रेष्ठिनः सुता ॥ ९० ॥

---

(१) ज निगद्यते । (२) ख ङ ज द मृत्यौ ।
(३) ज -दृतम् ।

साऽपि दध्यौ विलोक्यैनमहो ! रूपमहो ! प्रभा ।
शरीरं पुरुषस्याऽस्य किं तद्यन्न मनोहरम् ॥ ९१ ॥
हा दैव ! निर्मिताऽहं तु नारी मारीव किं त्वया ।
ईदृग्मनुष्यरत्नानां जीवितान्तविधायिनी ॥ ९२ ॥
तदासन्नस्थशय्यायामासीनोऽथ महामतिः ।
आललाप कुमारस्तां मधुरालापपण्डितः ॥ ९३ ॥
तथा कथञ्चित्तेनेयं रञ्जिताऽचिन्तयद्यथा ।
आत्मानमपि हत्वाऽहं रक्षाम्येतस्य जीवितम् ॥ ९४ ॥
एवं विचिन्तयन्ती सा तत्क्षणायातनिद्रया ।
जीवितार्थमिवैतस्य बभूव गतचेतना ॥ ९५ ॥
कुमारोऽथ गवाक्षेणोत्तीर्याऽधो भूमिकागतम् ।
काष्ठमेकमुपादाय तेनैवाऽऽरोहति स्म सः ॥ ९६ ॥
काष्ठं निवेश्य शय्यायां विकोशतरवारियुक् ।
तस्थौ दीपस्य च्छायायामीक्षमाणो दिशोऽखिलाः ॥ ९७ ॥
[1]वातायनविवरेणाऽन्तरे मुखमेककम् ।
प्रविशन्तमसौ दृष्ट्वाऽप्रमत्तोऽभूद्दिशेषतः ॥ ९८ ॥
मुखेन तेन तस्मिंस्तु वासगेहे निरीक्षिते ।
प्रविवेश ततो हस्तः समुद्रालङ्कृताङ्गुलिः ॥ ९९ ॥
औषधीवलयाभ्यां स मण्डितश्च तदेकतः ।
निर्ययौ फूत्कृतो धूमस्तेन व्याप्तं च तद् गृहम् ॥ १०० ॥

---

(१) ख घ ज ङ कुमारोऽथ गवाक्षेणा- ।

प्रविश्य स करो यावत् शय्यां पस्पर्श यामिकीम् ।
जघान वत्सराजोऽपि तं तावन्निशितासिना ॥ १ ॥
देवतायाः प्रभावेण स हस्तो नाऽपतद्भुवि ।
पपात चौषधिद्वन्द्वं वेदनार्त्तात्ततः क्षणात् ॥ २ ॥
धूमौषधीसंरोहिण्यौ कुमारः सोऽग्रहीदिमे ।
देवतायाः करः सोऽथ निर्ययौ वासमन्दिरात् ॥ ३ ॥
वत्स ! हा वञ्चितास्मीति शब्दं श्रुत्वाथ दैवतम् ।
हे दासि ! कुत्र यासीति जल्पंस्तां किञ्चिदन्वगात् ॥ ४ ॥
ततश्चोद्गीर्णखड्गं तं दृष्ट्वा पुरुषेण संयुतम् ।
देवता नश्यति स्मास्याऽपकारं कर्त्तुमक्षमा ॥ ५ ॥
वलित्वा वत्सराजोऽपि काष्ठमुत्कार्य तत्पतः ।
तत्र यावदुपाविक्षत्तमौ तावत् क्षयं ययौ ॥ ६ ॥
सूरोऽपि तस्य शूरस्य प्रतापमिव वीक्षितुम् ।
तूर्णमारोहति स्मोच्चैरुदयाचलमूर्धनि ॥ ७ ॥
अथान्तरे 'कुमारी सा जजागार ददर्श च ।
कुमारमक्षताङ्गं तं ततो हृष्टा व्यचिन्तयत् ॥ ८ ॥
नूनं कोऽपि प्रभावोऽस्य पुंरत्नस्य भविष्यति ।
यदयं संस्थितो नो मेऽथवा भाग्यानि जाग्रति ॥ ९ ॥
यद्यसौ मम भर्ता स्याद्भोगान् भुञ्जे ततो ध्रुवम् ।
अन्यथा विषयाणां मे निवृत्तिरिह जन्मनि ॥ १० ॥

---

(१) ख ज कुमारं तं दृष्ट्वा तत्पगतं तदा ।
साऽत्यजं विक्रयपरा प्रहृष्टैवं व्यचिन्तयत् ॥ ८ ॥

विचिन्त्येवमभाषिष्ट सा पिकी मधुरस्वरा ।
कथं त्वं व्यसनान्नाथ ! मुक्तोऽसीति निवेदय ? ॥ ११ ॥
तेनापि कथितं तस्यै राचिद्वृत्तं यथातथम् ।
तच्छ्रुत्वा जातरोमाञ्चकञ्चुका सा मुदं दधौ ॥ १२ ॥
इति संलापपरयोस्तयोर्दासी समागता ।
तस्या मुखक्षालनार्थं जलमादाय निर्मलम् ॥ १३ ॥
कुमारमक्षताङ्गं सा दृष्ट्वा हर्षेण पूरिता ।
श्रेष्ठिनं वर्धयामास तत्क्षेमकथया द्रुतम् ॥ १४ ॥
स्खलद्गतिप्रचारोऽथ दत्तः श्रेष्ठी ससम्भ्रमः ।
तयोः समीपमायातो हर्षाश्रुभिः पूरितेक्षणः ॥ १५ ॥
श्रीदत्ताऽपि समुत्थाय ददौ तस्मै शुभासनम् ।
सोऽपि तत्र समासीनः कुमारं समभाषत ॥ १६ ॥
कथं वीर ! त्वया रात्रौ निस्तीर्णो व्यसनार्णवः ।
कुमारेणाऽपि सर्वोऽपि वृत्तान्तोऽस्य निवेदितः ॥ १७ ॥
स ऊचे ते मया दत्ता पुत्रीयं प्राणवल्लभा ।
कल्प इत्यन्यथा लब्धा स्वयमेव त्वया गुणैः ॥ १८ ॥
कुमारोऽवोचदज्ञातकुलस्य मम कन्यकाम् ।
कथं ददासि, श्रेष्ठ्याचे ज्ञातं तव गुणैः कुलम् ॥ १९ ॥
पुनरुक्तं कुमारेण कारणेन गरीयसा ।
गन्तव्यमस्ति मे दूरं करिष्ये वलितस्त्विदम् ॥ २० ॥
इमां परिणयेदानीं पश्चाद्गच्छेर्यथारुचि ।
इत्युक्ते श्रेष्ठिना भूयोऽङ्गीकृतं तेन तद्वचः ॥ २१ ॥

तस्मिन्नेव दिने श्रेष्ठी पाणिग्रहणमेतयोः ।
अकारयन्निशामेकामुषितोऽसौ तया सह ॥ २२ ॥
द्वितीयेऽहनि गत्यर्थमापृष्टा तेन साऽवदत् ।
हे कान्त ! किं न जानासि स्वरूपं रागिणामदः ॥ २३ ॥
विरहो वसन्तमासो नवस्नेहो नवं वयः ।
पञ्चमस्य ध्वनिश्चेति सह्याः पञ्चाग्नयः कथम् ? ॥ २४ ॥
वत्सोऽवादीत् कुरङ्गाक्षि ! यामि देशान्तरं न चेत् ।
तन्मे वह्निप्रवेशः स्यादित्यर्थे नास्ति संशयः ॥ २५ ॥
साऽवोचद्देशिदण्डोऽयं त्वत्पुरो विहितो मया ।
स्थास्याम्यत्र शरीरेण हृदैष्यामि त्वया सह ॥ २६ ॥
कुङ्कुमं कज्जलं चैव कुसुमाभरणानि च ।
लगिष्यन्ति शरीरे मे त्वयि कान्त ! समागते ॥ २७ ॥
इत्थं कृतप्रतिज्ञां तां मुक्त्वा सोऽथ्सुखीं प्रियाम् ।
श्रेष्ठिनं समनुज्ञाप्य वत्सराजोऽग्रतोऽचलत् ॥ २८ ॥
ददर्शाऽग्रेऽटवीमध्ये पल्लीं भिल्लसमाकुलाम् ।
बहूंश्च पर्वतांस्तुङ्गान् रम्यांश्च गिरिनिम्नगाः ॥ २९ ॥
असावेवंविधाऽटव्यां स्थाने चैकत्र सुन्दरे ।
पश्यति स्म पुरीमेकामभ्रंलिहगृहाञ्चिताम् ॥ ३० ॥
बहिः सरोवरे तस्याः प्रक्षाल्य चरणानने ।
कृत्वा पर्यस्तिकां सेतावुपविष्टस्तरोस्तले ॥ ३१ ॥
नारीसार्थेन पानीयमुह्यमानं ददर्श सः ।
पप्रच्छ चैकां तन्मध्यात् कैषा पूः कोऽत्र भूपतिः ? ॥ ३२ ॥

साऽवदत् पूरियं भद्र ! कृता व्यन्तरजातिभिः ।
देवताभिः क्रीडनार्थं नान्यः कोऽप्यत्र भूपतिः ॥ ३३ ॥
वत्सराजः पुनः प्रोचे तर्ह्येतत्प्रचुरं जलम् ।
किमर्थमुह्यते भद्रे ! ततश्चैवं शशंस सा ॥ ३४ ॥
याऽस्माकं स्वामिनी देवी स्थाने क्वापि गता सती ।
पुंसा केनाऽपि सा बाहौ प्रहृता पीडिता ततः ॥ ३५ ॥
एतत्पीडानिरासार्थं जलसेको विधीयते ।
तेनेदमुह्यते नीरं सा त्वद्याऽपि न शाम्यति ॥ ३६ ॥
अङ्गपीडापहारे किं नेश्वरी देवताप्यहो ! ।
दृष्टेति वत्सराजेन पुनरेवं जगाद सा ॥ ३७ ॥
प्रहारदायकस्याङ्गरक्षिका देवताधिका ।
तत्प्रभावेण नैतस्या वेदनोपशमो भवेत् ॥ ३८ ॥
औषधीद्वितयं चास्याः करेऽभूत् सप्रभावकम् ।
दत्तमत्यन्ततुष्टेन व्यन्तरेन्द्रेण यत्किल ॥ ३९ ॥
धूमेन मोहयत्येकाऽपरा घातार्तिनाशिनी ।
ते पुनः पतिते तत्र यत्र खड्गेन ताडिता ॥ ४० ॥
वत्सराजस्ततोऽवादीन्मानुषो भिषगस्म्यहम् ।
मह्यं ददातु सा किं नु वेदनां शमयामि चेत् ? ॥ ४१ ॥
सा स्माह लभसे तत् त्वं ध्रुवं यद्भद्र ! याचसे ।
तिष्ठ तावत् परं यावत् स्वामिन्याः कथयाम्यदः ॥ ४२ ॥
ततो गत्वा तयाऽऽचख्ये तत्तस्यै सापि तत्क्षणात् ।
[1]तं तयाऽऽनाययामास सापि तस्मै शशंस च ॥ ४३ ॥

प्रसन्नास्या यदा भद्र ! स्वामिनी मार्गयेस्तदा ।
प्रासादस्योपरितनभूमिस्थं कन्यकायुगम् ॥ ४४ ॥
अश्वरूपं तथा यत्तं पर्यङ्कं कामितप्रदम् ।
एवं करिष्यामीत्युक्ता स ययौ देवतान्तिकम् ॥ ४५ ॥
दत्तासनोपविष्टोऽसौ तया प्रोक्तः सगौरवम् ।
जानासि वैद्यकं चेत्त्वं भद्र ! पीडां[२] निवारय ॥ ४६ ॥
विधाय वत्सराजोऽथ [३]वाचा वैद्यकविस्तरम् ।
धूमौषध्या महाधूममहरच्चान्यया व्यथाम् ॥ ४७ ॥
वेदनाऽपहृता यावज्जुजा जाता पुनर्नवा ।
तावत् प्रोचे तया भद्र ! घातदाता त्वमेव मे ॥ ४८ ॥
आमेति भणिते तेन साऽवादीत्तोषनिर्भरा ।
याचस्व स्वेच्छया भद्र ! तुष्टाहं साहसेन ते ॥ ४९ ॥
ततश्च याचितं तेन तत्कन्यायुगलं वरम् ।
यत्तसुरङ्गरूपस्तु पर्यङ्कः कामितप्रदः ॥ ५० ॥
सञ्जातो गृहभेदोऽयमिति ध्यात्वा जजल्प सा ।
दत्तमेतत् परं त्वस्य शृणूत्पत्तिं त्वमादितः ॥ ५१ ॥
आसीच्चमरचञ्चायां पुर्यां वैताढ्यपर्वते ।
गन्धवाहगतिर्नाम्ना विद्याधरनरेश्वरः ॥ ५२ ॥

---

(१) ख ज तासुवाचानयाङ्गाय सा नयन्ती जगाद तम् ।
ददाति यदि ते तुष्टा स्वामिनी मार्गयेस्तदा ॥ ४३ ॥
(२) ज पराकुरु । ङ ञ ट हरायु तत् ।
(३) ख ज सात्त्विकैकशिरोमणिः ।

सुवेगामदनवेगे तस्याऽभूतामुभे प्रिये ।
रत्नचूलास्वर्णचूले तयोश्च क्रमजे सुते ॥ ५३ ॥
विवाहचिन्तया पुत्र्योराकुलस्यान्यदा गृहे ।
[1]खेचरेन्द्रस्य तस्याऽगादेको विद्याधरो मुनिः ॥ ५४ ॥
आसयित्वाऽऽसने रम्ये नमस्कृत्य च भक्तितः ।
पृष्टस्तेन मुनिः पुत्र्योर्भर्त्ता कोऽत्र भविष्यति ? ॥ ५५ ॥
आचख्यौ ज्ञानवानेष वत्सराजो नृपात्मजः ।
भविष्यत्यनयोर्भर्त्ता गुणवान् भूमिगोचरः ॥ ५६ ॥
न तु त्वत्सन्निधौ भावि पाणिग्रहणमेतयोः ।
मासशेषं महाराज ! तवायुर्वर्तते यतः ॥ ५७ ॥
तर्हि किं कार्यमित्युक्ते भूभुजा सोऽवदत् पुनः ।
शृणु राजन् ! कुमारोऽसौ भावी भर्त्ता यथाऽनयोः ॥ ५८ ॥
आसीत्त्वद्भगिनी पूर्वं भूमिगोचरभूपतेः ।
पित्रा शूराऽभिधानस्य या दत्ता सख्युरात्मनः ॥ ५९ ॥
[2]तस्या चाभूच्छुभाकाराऽपरा [3]कान्ता नृपात्मजा ।
तस्यां प्रेमप्रकर्षोऽस्याऽनिष्टा सा भगिनी तव ॥ ६० ॥
सा विद्वेषं गता तस्यां कृत्वा बालतपो मृता ।
समुत्पन्नाऽस्ति हे राजन् ! व्यन्तरी देवता वरा ॥ ६१ ॥

---

(१) ख ज राज्ञा तस्य समायातः कस्मिंज्ज्ञानी महामुनिः ।
(२) ञ द तस्या जन्मान्तरस्नेहसम्बद्धाऽन्याऽपि गेहिनी ।
अभूत्तदनुरक्तस्याऽनिष्टा सा भगिनी तव ॥ ६० ॥
(३) ज कान्तिः ।

तस्याः सपत्नी सा कृत्वा धर्मदानादिकं वरम् ।
मृत्वा च श्रेष्ठिनः पुत्री सञ्जाता दत्तसंज्ञिनः ॥ ६२ ॥
पूर्वमत्सरिणी देवी सा तस्या यामिकं नरम् ।
हन्त्यद्याऽपि ततस्तत्र वर्तते पुरुषत्रयः ॥ ६३ ॥
देवतायास्तदेतस्या राजन् ! पुत्रौ समर्पय ।
तत्पार्श्वे स्थितयोर्भर्त्ता समेष्यत्यनयोः स्वयम् ॥ ६४ ॥
क्रियमाणं देवताया तं निवार्य नरत्रयम् ।
परिणेष्यति तां वत्सराजः श्रेष्ठिसुतामपि ॥ ६५ ॥
इति सर्वं समाख्याय ययौ सोऽन्यत्र संयतः ।
खेचरेन्द्रेण पुत्रौ मे तेनेहैत्य समर्पिते ॥ ६६ ॥
सोऽथ किञ्चित्तपः कृत्वा मृत्वाऽभूद् व्यन्तराधिपः ।
तेनाऽश्वरूपभृद्यत्तः किंकरो मे समर्पितः ॥ ६७ ॥
सर्वकामितपर्यङ्कश्चौषधिद्वितयं तथा ।
तत्सर्वमपि ते भद्र ! प्रदत्तं तुष्टया मया ॥ ६८ ॥
परिणीते ततश्चैते वत्सराजेन कन्यके ।
बुभुजे च समं ताभ्यां तत्र भोगानसौ स्थितः ॥ ६९ ॥
अन्यदा रत्नचूलास्वर्णचूले निजे प्रिये !
ज्ञापिते वत्सराजेन प्रतिज्ञाकारणं निजम् ॥ ७० ॥
ताभ्यां च ज्ञापिता देवी सा च विज्ञाय कारणम् ।
व्यसृजत् प्रेयसीयुक्तं तद्वियोगाऽसहाऽपि तम् ॥ ७१ ॥
ततः पर्यङ्कमारुह्य वत्सराजः सवल्लभः ।
आययौ नभसा शीघ्रं श्रीदत्तावासमन्दिरम् ॥ ७२ ॥

सुप्तोत्थिता प्रभातेऽथ श्रेष्ठिपुत्री ददर्श तम् ।
पर्यङ्कं तं तुरङ्गं च किमेतदिति विस्मिता ? ॥ ७३ ॥
दध्यौ च हेतुना केन पर्यङ्कोऽयमिहागतः ।
कथं वाऽयं समारूढो वाजी सप्तमभूमिकाम् ॥ ७४ ॥
सम्यग्विलोकयामास यावत्तावद्ददर्श सा ।
शय्यागतं निजं कान्तं कान्ताहृदयसमन्वितम् ॥ ७५ ॥
ततो हर्षपूरिताऽङ्गी गत्वा तातस्य सन्निधौ ।
साख्यद्गेहोपरितनभूमौ मत्पतिराऽऽगतः ॥ ७६ ॥
श्रेष्ठ्यूचे समभूद्वत्से ! कथमेवं तदागतिः ? ।
ततः शय्याऽवलोकादिवार्त्ताऽऽचख्ये तयाऽखिला ॥ ७७ ॥
अत्यद्भुतं तदाऽऽकर्ण्य सोऽगात्तत्र ससम्भ्रमः ।
उत्थाय वत्सराजोऽथ सप्रियः प्रणनाम तम् ॥ ७८ ॥
पृष्टोऽथ श्रेष्ठिना वत्सः स्वहृत्तान्तं न्यवेदयत् ।
विस्मितस्तच्चरित्रेण शिरो धूनयति स्म सः ॥ ७९ ॥
तद्दिनं समतिक्रम्याऽनुज्ञाप्य श्रेष्ठिनं ततः ।
निजस्थानं स सम्प्राप्तः शय्यामारुह्य सप्रियः ॥ ८० ॥
कुर्वत्यौ पुत्रशय्यायाः सदा नीराजनाविधिम् ।
धारिणीविमले तस्यां तथास्थं तमपश्यताम् ॥ ८१ ॥
अपनीय ततो वस्त्रं दृष्ट्वा पुत्रं च सप्रियम् ।
किञ्चिद् व्रीडाङ्गया तस्याऽपक्रान्ते ते शनैः शनैः ॥ ८२ ॥
क्षणान्तरेण संप्राप्ते ते विलोक्य समुत्थितः ।
नमश्चक्रे तयोः पादान् वत्सराजः प्रियान्वितः ॥ ८३ ॥

कथयामास वार्त्तां च निजां विस्मयकारिणीम् ।
उत्तरीयं ययाचे च[1] पर्यङ्कं सार्वकामिकम् ॥ ८४ ॥
गत्वा च भूपतेः पार्श्वे विधाय च नमस्कृतिम् ।
तद्दस्तमर्पयामास तत्पत्न्याः कमलश्रियः ॥ ८५ ॥
चिरायुर्वत्स ! भूयास्त्वमित्यूचे सा प्रमोदिनी ? ।
चक्रे राजाऽपि सत्कारमेतस्याऽऽभरणादिभिः ॥ ८६ ॥
कुत्र चीरं त्वया प्राप्तं क्व वा भ्रान्तोऽसि सुन्दर ! ? ।
पप्रच्छ चेति भूपालो वत्सराजं सविस्मयः ॥ ८७ ॥
पर्यङ्कतुरगलाभं विना वार्त्तां निजामसौ ।
राज्ञो न्यवेदयद्दस्तं दत्तं देवतयेति च ॥ ८८ ॥
अथान्येद्युः कमलश्रीः परलोकमियाय सा ।
तद्वियोगे नरेन्द्रोऽसौ महाशोकाकुलोऽभवत् ॥ ८९ ॥
वत्सराजोऽभ्यधाद् राजन् ! अनित्याऽखिलवास्तवे ।
भवे विवेकिनां शोकः कर्तुं क्वाऽपि न युज्यते ॥ ९० ॥
सर्वज्ञभिषगादिष्टं कोष्ठशुद्धिविधायिकम् ।
शोकावेशरुजः शान्त्यै कार्यं धर्मौषधं बुधैः ॥ ९१ ॥
इत्यादिवचनैस्तस्य परिषिक्तोऽमृतैरिव ।
सच्छायः सुमनोवांञ्छाऽशोकोऽभूत् स महीपतिः ॥ ९२ ॥
वत्सोऽथ मन्त्रयामास प्रेयसीभिः सहान्यदा ।
स्वगृहे भोजयाम्यद्य भूपं वः प्रतिभाति चेत् ॥ ९३ ॥

---

(१) ङ ज ञ ट -च ।

ताभिः प्रोचे न ते युक्तं नृपस्याऽऽनयनं गृहे ।
देहि तत्रैव तत्तस्मै दित्साऽस्ति यदि हे प्रिय ! ॥ ९४ ॥
सोऽवदद्गौरवं कान्ताः ! भवेन्नैवं कृते सति ।
यदीहानीयते राजा तन्मे भवति निर्वृतिः ॥ ९५ ॥
जगदुः पुनरप्येता यद्ययं निश्चयस्तव ।
तदाऽऽनय नृपं तस्य दर्शनीया वयं न तु ॥ ९६ ॥
ततोऽसौ सपरीवारं गत्वा भूपं न्यमन्त्रयत् ।
भोजनायोपरोधेन तस्य मेने नृपोऽपि तत् ॥ ९७ ॥
निमन्त्र्य पार्थिवं वत्सराजः प्राप्तो निजं गृहम् ।
वल्लभाभिः सहाक्रीडत् तत्रोपरितनावनौ ॥ ९८ ॥
कियान् रसवतीपाको वर्त्ततेऽस्य निकेतने ।
इति ज्ञातुं प्रतीहारं प्रैषीत्तत्र महीपतिः ॥ ९९ ॥
प्रतीहारोऽपि तद्गेहे गत्वा यावदालोकयत् ।
नावद्रसवतीपाकं तत्र कञ्चिद् ददर्श न ॥ ७०० ॥
तेनाऽऽगत्य महीभर्तुस्तदाचख्ये ततोऽपरम् ।
नरं संप्रेषयामास तदीक्षणकृते नृपः ॥ १ ॥
धान्यपाकादिसामग्रीं तद्गृहेऽन्यगृहेषु च ।
अदृष्ट्वाऽकथयत् सोऽपि तत्सर्वं जगतीपतेः ॥ २ ॥
भोजनाऽवसरे वत्सराजोऽभ्येत्य महीपतिम् ।
भोक्तुमाऽऽकारयामास राजाऽप्येवमभाषत ॥ ३ ॥
उपहासपदं किं नु वयं वर्त्तामहे तव ? ।
विनाऽपि येन सामग्रीमाकारयसि नो गृहे ॥ ४ ॥

वत्सराजोऽवदद् देव ! पूज्योऽसि मम सर्वथा ।
स्वामिन्नुपहासपदमित्यादेशं ददासि किम् ? ॥ ५ ॥
रसवत्यस्ति नो वेति का ते चिन्ता महीपते ! ।
मय्यप्यसम्भावनां त्वं किं विभावयसि प्रभो ! ? ॥ ६ ॥
तद्वाक्योत्साहितो राजा स्वपरीवारसंयुतः ।
तद्देश्मनि गतोऽपश्यत्तत्र रम्यं जनाश्रयम् ॥ ७ ॥
तं दृष्ट्वाऽचिन्तयच्चैवमस्य वृत्तमलौकिकम् ।
येनायं मण्डपश्चारुरघुनैव विनिर्मितः ॥ ८ ॥
यथायोग्यं कल्पितेषु तत्र रम्याऽऽसनेषु ते ।
निर्दिष्टेष्वमुनैवाऽथ निषेदुः पार्थिवादयः ॥ ९ ॥
स्वर्णरूप्यरत्नमयान्युरुस्थालानि तत्क्षणात् ।
ढौकितानि पुरस्तेषां वत्सराजस्य मानुषैः ॥ १० ॥
दत्ता कल्पद्रुमेणैव दिव्या रसवती तदा ।
सुशालिभक्तप्रमुखा मनोज्ञा परिवेषिता ॥ ११ ॥
सुस्निग्धमधुरास्वादा मोदकाः सिंहकेसराः ।
मण्डिकाः खाद्यकादीनि पक्वान्नान्यपराणि च ॥ १२ ॥
रसानामग्रिमं सद्यस्तापितं शुभगन्धयुक् ।
भोजनस्य विधेः सारं प्रचिप्तं प्रचुरं घृतम् ॥ १३ ॥
लपनश्रीघृतपूरगोरसव्यञ्जनादिका ।
रसवत्यऽखिला तत्र व्याप्ताऽतिमनोहरा ॥ १४ ॥
भुञ्जानेऽथ महीपाले वत्सराजो व्यचिन्तयत् ।
उत्सवः सकलोऽप्येष विना पत्नीर्न शोभते ॥ १५ ॥

एवं विचिन्त्य भणितास्तेनेदं निजवल्लभाः ।
प्रकटीभूय भूभर्तुर्गौरवं कुरुताऽनघाः ! ॥ १६ ॥
यद्दर्शयति नो यस्य हितं नाऽऽर्यसुतस्य तत् ।
एवं मिथो वदन्त्यस्तास्तदादेशं वितेनिरे ॥ १७ ॥
रत्नचूला-स्वर्णचूला-श्रीदत्तानां मनोहरम् ।
रूपं दृष्ट्वा महीपालो जज्ञे कामवशंवदः ॥ १८ ॥
दध्यौ च धन्य एवाऽयं यस्यैताः प्रवरा गृहाः ।
विष्टपत्रितयस्याऽपि वर्णिनीवर्णिका इव ॥ १९ ॥
भोजनोर्द्वं सुताम्बूलवस्त्राद्यैः परिपूजितः ।
भूपतिः सपरीवारोऽप्याययौ निजवेश्मनि ॥ २० ॥
तत्राऽप्यरतिमापन्नस्तासां सङ्गमलालसः ।
स्वकार्यसाधनोपायं सोऽपृच्छद् मन्त्रिमण्डलम् ॥ २१ ॥
आलोच्य मन्त्रिणोऽप्येवं शशंसुः पृथिवीपतेः ।
जीवत्यदो वत्सराजे कार्यं राजन् ! न सेत्स्यति ॥ २२ ॥
ततः केनाऽप्युपायेन वत्सोऽयं देव ! हन्यते ।
सोऽब्रवीदिति कृत्वाऽपि कार्यं मम समीहितम् ॥ २३ ॥
अन्येद्युर्मारणार्थं स सिंहस्य जगतीपतेः ।
स्थाने निवेशितोऽमात्यैर्महाराजस्य संसदि ॥ २४ ॥
कुमारो यावदास्थानादभीतः स निरीयिवान् ।
अमुं व्यापादयेत्युक्तस्तावत्सिंहो नियोगिभिः ॥ २५ ॥
सिंहोऽपि निजगादैनं सिंहद्वाराद्विनिर्गतः ।
अतिधृष्टोपविष्टोऽसि किमरे ! मम विष्टरे ? ॥ २६ ॥

युद्धायोपस्थितः सोऽथ कुमारेण महौजसा ।
क्षिप्तो दूरेण परितो भ्रमयित्वा शिरो निजम् ॥ २७ ॥
वत्सस्य वाञ्छिते मृत्यौ सिंहस्यैव बभूव सः ।
चिन्त्यते यत्परस्येह गृहमायाति तद् ध्रुवम् ॥ २८ ॥
सहसैव हते तस्मिंस्तत्सैन्यं हतशक्तिकम् ।
भूपतिशरणं प्राप को बिभेति न घातकात् ॥ २९ ॥
प्रियाभ्यां खेचरीभ्यां स वत्सः प्रोक्तो गृहागतः ।
अस्मद्विद्याप्रभावेन नाथ ! सिंहो हतस्त्वया ॥ ३० ॥
अनर्थोऽयं कृतो राज्ञा करिष्यत्यपरं च सः ।
गृहप्राप्तस्य तस्यार्य ! यत्त्वया दर्शिता वयम् ॥ ३१ ॥
मन्त्रिभिः सममालोच्य भूभुजा सोऽपरेद्यवि ।
व्याघ्रीदुग्धेन नः कार्यं किञ्चिदस्तीति जल्पितः ॥ ३२ ॥
अन्यच्च त्वयि सख्यौ मे नास्ति किञ्चित् सुदुर्लभम् ।
लहर्यः सुलभास्तस्य यस्य मित्रं महोदधिः ॥ ३३ ॥
आदाय भर्त्तुरादेशं स स्वगेहमुपागतः ।
अन्तश्चिन्ताभरम्लानमुखो दारैर्निरीक्षितः ॥ ३४ ॥
उक्तश्च नाथ ! सम्प्राप्ते क्षुद्रादेशे महीपतेः ।
किं त्वं चिन्तातुरो येन चलस्नेहा भवन्त्यमी ॥ ३५ ॥
कथं यूयमदो वित्थेत्युदिते तेन ताः पुनः ।
जगदुर्यत्त्वया सार्धं चरामोऽन्तरिताः सदा ॥ ३६ ॥
दैवताश्वं समारुह्य याहि भीमाटवीं प्रिय ! ।
अस्मन्मातुर्देवतायाः सखी तत्राऽस्ति देवता ॥ ३७ ॥

तुरङ्गं सा विलोक्यैनं त्वां ज्ञास्यति ततश्च ताम् ।
व्याघ्रीरूपां समानीय महीभर्तुः समर्पये: ॥ ३८ ॥
इत्यादिष्टः स्वपत्नीभिर्गत्वा तत्र क्रमेण सः ।
व्याघ्रीरूपां देवतां तां कर्णे धृत्वा समानयत् ॥ ३९ ॥
ऊचे च नवसूतेयं गृह्यतां दुह्यतां नृप ! ।
क्रियतां चेप्सितं स्वस्येत्युक्त्वा कर्णान्मुमोच ताम् ॥ ४० ॥
ततः सा व्यन्तरी व्याघ्री तदानयनधीप्रदान् ।
मन्त्रिणो भक्षयामास ततो भीतोऽवदन्नृपः ॥ ४१ ॥
हा वत्स ! वत्स ! मा कार्षीः कर्म हिंस्रं त्वमीदृशम् ।
गृहाणेमां जनं यावत् क्षयं नयति नाखिलम् ॥ ४२ ॥
स्वगृहे वत्सराजोऽथ कर्णे धृत्वा निनाय ताम् ।
गाढाभ्यर्थनया राज्ञः सर्वपौरजनस्य च ॥ ४३ ॥
पत्नीभिरर्चिता तस्य स्थित्वा तत्र क्षणान्तरम् ।
विसृष्टा वत्सराजेन निजं स्थानमियाय सा ॥ ४४ ॥
पुनरन्येद्युरुर्वीशस्तत्पत्नीसङ्गमस्पृहः ।
उपदेशादमात्यानां वत्सराजमदोऽवदत् ॥ ४५ ॥
स्नानात् कुतोऽपि भो भद्र ! जलपात्रीं [1]समानय ।
येन मे जायते देहं बहुरोगविवर्जितम् ॥ ४६ ॥
इदं क्वास्तीति तेनोक्ते कथितं तस्य मन्त्रिभिः ।
विन्ध्याटव्यां द्वयोरद्रोर्मध्यकूपोऽस्ति तज्जलम् ॥ ४७ ॥

---

(१) अत्र-।

कुरुतः सर्वदाऽप्येतौ सङ्गमापगमौ गिरौ ।
मीलनोन्मीलने नित्यं स्वभावेनेव लोचने ॥ ४८ ॥
प्रविश्य त्वं मिलित्वापक्रान्तयोरन्तरे तयोः ।
शीघ्रमेवातिदक्षत्वाद् भद्र ! पानीयमानयेः ॥ ४९ ॥
तमप्यादेशमादाय वत्सराजो गतो गृहे ।
कथयामास पत्नीनामुपायनिचयौकसाम् ॥ ५० ॥
ताभिः प्रोचेऽस्वमारुह्य गच्छ त्वं तत्र हे प्रिय ! ।
सखी नोऽस्ति शकुनिकारूपश्चद्देवता वरा ॥ ५१ ॥
ततस्तत्र जगामाऽसौ ज्ञात्वा शकुनिकाऽपि तम् ।
पूरयित्वाऽम्बुनालाबु तस्य हस्ते समार्पयत् ॥ ५२ ॥
स्वपुरीं स समागत्य नृपस्याम्बु तदार्पयत् ।
देवतायाः प्रभावेण जजल्पैवं तदुच्चकैः ॥ ५३ ॥
राजंस्त्वामथवामात्यान् प्रधानं वा परं नरम् ।
तव दुर्बुद्धिदातारं कमहं भक्षयाम्यहो ! ॥ ५४ ॥
इति नीरवचः श्रुत्वोपविष्टो नृपपर्षदि ।
विसिष्मिये जनोऽपूर्णकामो मन्त्री च पार्थिवः ॥ ५५ ॥
कृत्वा तथाऽपि वदनविकाशं सोऽब्रवीदहो ! ।
असाध्यं किञ्चनाऽप्यस्य विद्यते नावनीतले ॥ ५६ ॥
विसृज्यैनं गृहे सोऽथाऽमन्त्रयन्मन्त्रिभिः सह ।
अस्य व्यापादनोपायः कोऽप्यन्यः सूत्र्यतामिति ॥ ५७ ॥
आलोच्य मन्त्रिणः प्रोचुः चत्वारः पृथिवीपतिम् ।
देव ! श्रीसुन्दरीकन्याविवाहव्यपदेशतः ॥ ५८ ॥

कारयित्वा यमगृहं दक्षिणस्यां पुरो दिशि ।
वत्सः प्रवेश्यतां तत्र निमन्त्रणकृते हरेः ॥ ५८ ॥ (युग्मम्)
साधु साध्विति राजा तान् प्राशंसत्ते च दक्षिणे ।
दिग्भागे कारयन्ति स्म गर्तामिन्धनपूरिताम् ॥ ६० ॥
ज्वालयित्वा च तत्राग्निं ज्ञापयन्ति स्म ते नृपम् ।
राजाऽप्याज्ञापयामास भटान् यमनिमन्त्रणे ॥ ६१ ॥
कार्ये तस्मिन्ननिष्पद्यमानेऽन्यैर्जगतीभुजा ।
आदिष्टो वत्सराजोऽथ तदप्यङ्गीचकार सः ॥ ६२ ॥
दर्शयन्तीभिरस्नेहं कृतघ्नत्वं च भूपतेः ।
भार्याभिर्भणितोऽप्येष कार्यान्न व्यरमत्तदा ॥ ६३ ॥
गोपयित्वा गृहे कान्तं तद्रूपः सोऽथ किङ्करः ।
यत्तस्ताभिः समादिष्टो गतः सोऽपि नृपान्तिकम् ॥ ६४ ॥
मासेन त्वमिहागच्छेरित्यादिष्टो नृपेण सः ।
तस्य पश्यत एवाऽथ प्रविवेश हुताशने ॥ ६५ ॥
वत्सराजः प्रविष्टोऽग्नावित्यशेषपुरीजनः ।
प्राविशत् स्पर्धयेवास्य तीव्रशोकहुताशने ॥ ६६ ॥
जगाद च नरेन्द्रोऽयमहो ! निर्दयमानसः ।
येनानेकगुणस्थानं कुमारोऽयं निपातितः ॥ ६७ ॥
कुमारशोकनिद्रायां सुप्ते सत्यखिले जने ।
बभूव मुदितो राजा निशायामिव कौशिकः ॥ ६८ ॥
सोऽवीचन्मन्त्रिणो हंहो ! पन्नगोऽस्मानीयतामिह ।
तेऽवदन् विद्यतेऽग्रेऽपि विरक्ता त्वां प्रति प्रजा ॥ ६९ ॥

एवं कृते विशेषेण विरागं त्वयि यास्यति ।
विना जनानुरागं हि न सम्पदपि भाविनी ॥ ७० ॥
मासं यावत् प्रतीक्षस्व ततस्त्वमपि भूपते ! ।
उत्तालानां न पच्यन्ते उदुम्बरफलानि यत् ॥ ७१ ॥
गते मासे कुमारस्य प्रिया आनयितुं पुनः ।
आदिष्टा मन्त्रिणो राज्ञा चत्वारश्चतुरोक्तयः ॥ ७२ ॥
इतः कुमारपत्नीभ्यां देवीभूतो निजः पिता ।
यक्षं संप्रेष्य पातालादाहृतो व्यन्तरेश्वरः ॥ ७३ ॥
तस्याभरणसन्दोहैर्भूषितोऽथ पतिर्निजः ।
तेनाग्रगामिना प्रैषि वाज्यारूढो नृपान्तिकम् ॥ ७४ ॥
तं दृष्ट्वा भूपतिर्दध्यौ व्यलीकं विहितं खलु ।
अमुना वीरपुरुषेणेदं किल सुभाषितम् ॥ ७५ ॥
पुनर्दिवा पुना रात्रिः पुनः सूर्यः पुनः शशी ।
पुनः संजायते सर्वं न कोऽप्येति पुनर्मृतः ॥ ७६ ॥
पप्रच्छ चैवं किं वत्स ! क्षेमवान् वर्तते यमः ? ।
सोऽवदत् कुशली देव ! कालोऽस्ति भवतः सखा ॥ ७७ ॥
ममाप्राक्षीदसावेवं बहुकालात् स्मृतोऽस्मि किम् ।
वत्सराज ! त्वदीक्षेण वर्तमानोऽपि सोहृदे ? ॥ ७८ ॥
तव भृत्योऽप्यहं तेन[1] भक्त्या गौरवितः प्रभो ! ।
इदं मदङ्गलग्नं यत्तदत्तं भूषणं वरम् ॥ ७९ ॥

(१) ङ ज -नातीवगौ- ।

भवतां प्रत्ययार्थं च हारःस्थोऽयं प्रेषितोऽमुना ।
दृष्ट्वाऽनिमेषनेत्रं तं सत्यं मेने नृपोऽपि तत् ॥ ८० ॥
व्यन्तरेन्द्रोऽप्युवाचैवं प्रोक्तं दण्डधरेण यत् ।
मम पार्श्वे सदा राजन् ! प्रेषितव्या नरा निजाः ॥ ८१ ॥
इन्द्रादेशेन नास्माकमस्तीहागमनं नृप ! ।
मिलनाय ततो मित्र ! त्वयाऽऽगम्यं कथञ्चन ॥ ८२ ॥
इत्युक्ते राजलोकास्ते तत्र गन्तुं समुत्सुकाः ।
प्रतीहारेण भणिता आगच्छत मया सह ॥ ८३ ॥
ततो यमगृहस्यान्ते जग्मुस्ते पार्थिवादयः ।
तेषां च पश्यतामादौ तत्र दौवारिकोऽविशत् ॥ ८४ ॥
तत्पृष्टे भूभुजादिष्टाश्चत्वारो मन्त्रिणोऽविशन् ।
देवतामोहितात्मानो भस्मीभूताः क्षणेन ते ॥ ८५ ॥
ततस्तत्र नरेन्द्रोऽपि झम्पां दातुं समुद्यतः ।
वत्सराजकुमारेण बाहौ धृत्वा निवारितः ॥ ८६ ॥
भणितश्च यथा राजन् ! सर्वस्य विदितं ह्यदः ।
म्रियते तत्क्षणादेव [1]प्रविष्टो ज्वलने यतः ॥ ८७ ॥
देवतायाः प्रभावेण जीवितोऽहं महीपते ! ।
तयैव मोहयित्वाऽमी निहता मम शत्रवः ॥ ८८ ॥
यतो मन्त्रारणोपायस्त्वयाऽमीभिर्निवेदितः ।
ततो हता मयेति यत्कार्यं प्रतिकृतं कृते ॥ ८९ ॥

---

(१) ज ट प्रविष्टैर्ज्वलितानले ।

तस्य भक्त्या च शक्त्या च प्रसन्नः पृथिवीपतिः ।
किञ्चिच्च विफलारम्भो [1]क्षीमांश्चागान्निजं गृहम् ॥ ८० ॥
दध्यौ चेति मया पापमस्य दाररिरंसया ।
बह्वपार्जितमात्मा च लोकमध्ये लघूकृतः ॥ ८१ ॥
ध्यात्वेति सुन्दरीं कन्यां दत्त्वा तस्मै स भूपतिः ।
राज्यं च लोकसम्मत्या तापसः समजायत ॥ ८२ ॥
साधयित्वा बह्वन् देशान् पुण्यवान् दृढविक्रमः ।
महाराजपदं प्राप्तो वीरसेननृपात्मजः ॥ ८३ ॥
अथान्येद्युः पुमानेकः प्रणम्य जगतीपतिम् ।
इति विज्ञपयामास लेखढौकनपूर्वकम् ॥ ८४ ॥
क्षितिप्रतिष्ठितादेव ! नगरादागतोऽस्म्यहम् ।
भवद्विज्ञप्तिकालेखस्तत्पौरैः प्रेषितो ह्ययम् ॥ ८५ ॥
[2]लेखं समर्पयामास स्वपारिग्रहिकस्य तम् ।
उन्मुद्र्य वाचयामास सोऽप्येवं नृपतेः पुरः ॥ ८६ ॥

तद्यथा—

स्वस्तिपुर्य्यामुज्जयिन्यां वत्सराजं महीभुजम् ।
क्षितिप्रतिष्ठितात् पौरा नत्वा विज्ञपयन्त्यदः ॥ ८७ ॥
यथा ग्रीष्मार्दितो मेघं शीतार्तोऽग्निं जनः स्मरेत् ।
पीडिता देवराजेन स्मरामस्त्वां तथा वयम् ॥ ८८ ॥

---

(१) द-क्षा- ।
(२) ङ-ञ लेखं तमर्पयामास स्वपारिग्रहिकस्य सः ।

शीघ्रमेव समागत्य प्रभुत्वं त्वं कुरुष्व नः ।
अन्यथाऽन्यं श्रयिष्यामः स्वामिनं न्याय[1]निष्ठितम् ॥ ९९ ॥
श्रुत्वेति सर्वसामग्र्या वत्सराजो महीपतिः ।
प्रैषीद् दूतं तत्र गत्वा देवराजस्य भूपतेः ॥ ८०० ॥
ज्ञात्वा तमागतं सोऽपि सन्नद्ध्य निरगात् पुरात् ।
विरक्तस्तत्परीवारलोकश्चाप्यन्वगान्न तम् ॥ १ ॥
वत्सराजं बलीयांसं मत्वा स्वांश्च तथाविधान् ।
प्रणश्य स ययौ क्वाऽपि नान्यायविजयो नृणाम् ॥ २ ॥
लोकः प्रमुदितः सोऽथ महोत्सवपुरस्सरम् ।
पुरे प्रवेशयामास वत्सराजं नरेश्वरम् ॥ ३ ॥
एवं राज्यद्वयस्याऽपि स्वामित्वमनुपालयन् ।
सोऽन्यदोद्यानपालेन विज्ञप्तो नतिपूर्वकम् ॥ ४ ॥
स्वामिन् ! संवर्ध्यसे प्रीत्या यतोऽद्य नगरे तव ।
चतुर्ज्ञानधरः सूरिरागत्य समवासरत् ॥ ५ ॥
गत्वा नत्वा मुनीन्द्रं तं यथास्थानं निविश्य च ।
स पपौ देशनानीरं गुरुवक्त्राद्विनिर्गतम् ॥ ६ ॥
यतिश्रावकयोर्धर्ममाकर्ण्य गुरुणोदितम् ।
श्राद्धधर्मं प्रपद्यासौ पुनरागान्निजं गृहम् ॥ ७ ॥
मासकल्पं विधायाऽत्र सूरिरन्यत्र सोऽगमत् ।
वत्सराजोऽप्यनेकानि जिनचैत्यान्यकारयत् ॥ ८ ॥

---

(१) ङ ञ -निष्ठुरम् । ज -र्वर्तनम् ।

जिनेन्द्रप्रतिमास्तत्र तासां चाष्टाह्निकोत्सवम् ।
धर्मकृत्यं तथान्यच्च गृहियोग्यं चकार सः ॥ ९ ॥
आचार्यः सोऽन्यदा तत्र पुनरेव समाययौ ।
ववन्दे च नरेन्द्रोऽसौ गत्वा तच्चरणद्वयम्[1] ॥ १० ॥
पप्रच्छ चान्यदा पूर्वभवे किं विहितं मया ? ।
यन्मेऽनुपदमायाता विपदः सम्पदोऽभवन् ॥ ११ ॥
सोऽवदत् शृयतां राजन् ! जम्बूद्वीपस्य भारते ।
शूरो नाम नृपोऽभूस्त्वं वसन्तपुरपत्तने ॥ १२ ॥
स शूरः सरलात्मा च क्षमी दाक्षिण्यसंयुतः ।
स्वभावेनैव निर्लोभो देवगुर्वर्चने रतः ॥ १३ ॥
दीनादिभ्यो वितीर्णस्वः प्रजापालनतत्परः ।
युक्तश्चतुर्विधनीत्या न्यायवान् दोषवर्जितः ॥ १४ ॥
स एवं गुणसंयुक्तो विशेषाच्छीलशोभितः ।
अतिप्रसक्तो दाने च पालयामास मेदिनीम् ॥ १५ ॥
सकलान्तःपुरीमध्ये तस्याऽभूदग्रवल्लभा ।
शूरवेगाभिधानेन विद्याधरकुलोद्भवा ॥ १६ ॥
उदूढा चापरा तेन रतिचूला नृपात्मजा ।
तस्यामासक्तचित्तोऽन्याः परित्यत्याज स प्रियाः ॥ १७ ॥
अतः परं समाख्यातं सर्वं देवतया तव ।
गन्धवाहगतिसुते यया त्वं परिणायितः ॥ १८ ॥

---

(१) ङ ञ ट -यीम् ।

स मृत्वा त्वं महाभाग ! जातोऽसि नृपनन्दनः ।
दानादिधर्ममाहात्म्याद्भोगसम्पत्समन्वितः ॥ १९ ॥
कृतं चैश्वर्यतः किञ्चिदन्तरायककर्म यत् ।
राज्यभ्रंशादिदुःखं तत् पूर्वे वयसि तेऽभवत् ॥ २० ॥
इत्याकर्ण्य समुत्पन्नजातिस्मृतिरसौ नृपः ।
विशेषपुण्यलाभार्थी जातो दीक्षासमुत्सुकः ॥ २१ ॥
संस्थाप्य तनयं राज्ये स श्रीशेखरनामकम् ।
चतसृभिरपि भार्याभिः समं जग्रे महाव्रती ॥ २२ ॥
पालयित्वा चिरं दीक्षां कृत्वा च विविधं तपः ।
मृत्वा समाधिना चान्ते सुरलोकमियाय सः ॥ २३ ॥
देवलोकात् परिच्युत्य मनुष्यत्वमवाप्य च ।
क्षपयित्वाऽखिलं कर्म मुक्तिसौख्यं स लप्स्यते ॥ २४ ॥
स एष कथितो राजन् ! यः पूर्वं सूचितो मया ।
शूरो राजा शुभभोगी विपत्कालेऽपि योऽभवत् ॥ २५ ॥

॥ इति वत्सराजकथा ॥

जातव्रतपरीणामो राजा मेघरथस्ततः ।
जिनं नत्वा गृहं गत्वा प्रोचे दृढरथं प्रति ॥ २६ ॥
बन्धो ! राज्यं गृहाण त्वं प्रतिपद्ये त्वहं व्रतम् ।
सोऽवादीदहमप्येवं करिष्यामि त्वया सह ॥ २७ ॥
तेनात्मतनयो राज्ये मेघसेनो निवेशितः ।
युवराजत्वे च रथसेनो दृढरथात्मजः ॥ २८ ॥

चतुःसहस्रैर्भूपानां सुतसप्तशतैस्तथा।
बन्धुना च समं सोऽथ प्रवव्राज जिनान्तिके ॥ २९ ॥
निरपेक्षो निजे देहे सोऽधिसेहे परीषहान्।
सदा समितिभिर्युक्तो गुप्तो गुप्तिभिरन्वहम् ॥ ३० ॥
प्रतिबोध्य बहून् जीवान् विहृत्य जगतीतले।
धौतकर्ममलो मोक्षं ययौ घनरथो जिनः ॥ ३१ ॥
स्थानैर्विंशतिभिः साधु प्रधानैरभिरर्जितम्।
रम्यं तीर्थकरगोत्रकर्म मेघरथर्षिणा ॥ ३२ ॥
अर्हत्-सिद्ध-प्रवचन-गुरु-स्थविर-साधुषु।
वात्सल्यं सर्वदा चक्रे बहुश्रुत-तपस्विषु ॥ ३३ ॥
ज्ञानोपयोगं चाभीक्ष्णं दर्शने विनये तथा।
आवश्यके तथा शीलव्रते निरतिचारवान् ॥ ३४ ॥
क्षणलवतपस्त्याग-वैयावृत्त्ये समाधिमान्।
अपूर्वज्ञानग्रहणे प्रयतः श्रुतभक्तियुक् ॥ ३५ ॥
प्रभावनां प्रवचने विदधाति स्म सर्वथा।
सिंहनिष्क्रीडितं नाम तपःकर्म चचार च ॥ ३६ ॥
संयमं पालयित्वाऽथ वर्षलक्षमनूनकम्।
व्यधादनशनं सोऽन्ते सानुजस्तिलकाचले ॥ ३७ ॥
त्यक्त्वा मलमयं देहं कृत्वा कालं समाधिना।
जज्ञे सर्वार्थसंज्ञेऽसौ विमानेऽनुत्तरे सुरः ॥ ३८ ॥

इत्थं जीवदयाविशेषभणनप्रह्लादितश्रावक-
श्चित्रोत्पादकवत्सराजनृपतेराख्यायिकाबन्धुरः।

रम्यानुष्टुपबन्धबृद्धिकलितः संक्षिप्तसन्दर्भको
व्याख्यातो दशमो भवो भगवतः शान्तेस्तथैकादशः ॥८३९॥

इत्याचार्यश्रीअजितप्रभसूरिविरचिते दशमैकादश-
भववर्णनो नाम पञ्चमः प्रस्तावः ॥

अथ षष्ठः प्रस्तावः ।

इतश्चात्रैव भरते युगादिजिनसन्ततिः ।
कुरुरित्यभवत् पूर्वं कुरुदेशस्तदाख्यया ॥ १ ॥
हस्तीति तत्सुतस्तेन निर्ममे [1]हस्तिनापुरम् ।
गृहाट्टरचनाहारि तुङ्गप्राकारगोपुरम् ॥ २ ॥
बहुसूरिकृतावासं शोभितं बहुमङ्गलैः ।
अपूर्वगगनाकारं तत्पुरं भूरिसूरवत् ॥ ३ ॥
विश्वसेनो नृपस्तत्र शौर्यौदार्यादिसद्गुणैः ।
विख्यातो जगतीपीठे विश्वसेन इवाभवत् ॥ ४ ॥
पुण्यलावण्यरुचिराऽचिरादेवीति तत्प्रिया ।
सर्वालङ्कारवरयाऽलङ्कृता च रतिस्त्रिया ॥ ५ ॥
इतो भाद्रपदे कृष्णसप्तम्यां भरणीगते ।
चन्द्रे सर्वग्रहेष्वुच्चस्थानस्थेषु निशान्तरे ॥ ६ ॥
च्युत्वा सर्वार्थतो मेघरथस्यात्मायुषः क्षये ।
अवतीर्णोऽचिरादेव्याः कुक्षौ सरसि हंसवत् ॥ ७ ॥
तस्मिंश्च समये देवी सुखसुप्ता चतुर्दश ।
महास्वप्नान् ददर्शैतानीषज्जागरिता सती ॥ ८ ॥

(१) ङ ज ञ ट हास्तिनं पुरम् ।

मातङ्गवृषहर्यर्चाः साभिषेकेन्दिरा तथा ।
पुष्पमालेन्दुसूर्यौ च ध्वजकुम्भौ सरोवरम् ॥ ९ ॥
सागरश्च विमानं च रत्नानां सञ्चयस्तथा ।
निर्धूमो हुतभुक् चेति स्वप्ना आगमभाषिताः ॥ १० ॥
दृष्ट्वा स्वप्नानिमान् देवी जातनिद्राक्षया क्षणात् ।
गत्वापराजमाचख्यौ प्रमोदभरनिर्भरा ॥ ११ ॥
प्रहृष्टमुखपद्मोऽथ जगाद जगतीपतिः ।
सर्वलक्षणसम्पूर्णो भावी देवि ! तवात्मजः ॥ १२ ॥
प्रसन्नवदना धर्मचिन्तया रात्रिशेषकम् ।
अतिक्रमयति स्मैषा कुस्वप्नालोकशङ्किता ॥ १३ ॥
सञ्जातेऽथ प्रगेऽष्टाङ्गनिमित्तज्ञानपण्डिताः ।
भूभुजाष्टावुपाध्याया आहूता निजपूरुषैः ॥ १४ ॥
कृतमङ्गलोपचाराः सम्प्राप्तास्ते नृपौकसि ।
दत्तासनेषूपविष्टाश्चार्चिताः कुसुमादिभिः ॥ १५ ॥
सुस्वप्नानां फलं राज्ञा पृष्टाश्चैवं बभाषिरे ।
अस्मच्छास्त्रे द्विचत्वारिंशत् स्वप्ना जगतीपते ! ॥ १६ ॥
महास्वप्ना अपि त्रिंशत् स्युः सर्वे ते द्विसप्ततिः ।
वीक्षिता येऽचिरादेव्या महास्वप्ना इमे स्फुटम् ॥ १७ ॥
अर्हतां चक्रिणां चैतान् स्वप्नान् पश्यन्ति मातरः ।
सप्तार्धचक्रिणां चाम्बा चतुरः सीरिणां तथा ॥ १८ ॥
प्रत्यर्धचक्रिणां त्रींश्चान्येषामुत्तमजन्मिनाम् ।
एकैकमम्बिकाः स्वप्नं पश्यन्त्येषां हि मध्यतः ॥ १९ ॥

दृष्टा यदचिरादेव्या महास्वप्नाश्चतुर्दश ।
तद्भावी त्वत्सुतो राजन् ! षट्खण्डभरताधिपः ॥ २० ॥
अथवाऽपि जिनाधीशो विश्वचित्तयवन्दितः ।
तच्छ्रुत्वा मुदितो राजा सुमुदे तत्प्रियाऽपि सा ॥ २१ ॥
राज्ञा विसृष्टास्ते स्वप्नपाठकाः प्रययुर्गृहम् ।
बभार गर्भं राज्ञी च रत्नगर्भेव सेवधिम् ॥ २२ ॥
अतिस्निग्धातिमधुरं चातितारातितिक्तकम्
वर्जयामास साऽऽहारं कषायकटुकं तथा ॥ २३ ॥
महान्तमशिवं तस्मिन्नासीत् पूर्वं पुरे तदा ।
सञ्जातो मान्यदोषेण लोकस्य प्रलयो महान् ॥ २४ ॥
गन्धहस्तिगन्धेनान्यदन्तिमदवत् क्षणात् ।
उपशान्तं तदशिवं प्रभावाद् गर्भगप्रभोः ॥ २५ ॥
ततश्च चिन्तितं तातजननीभ्यामहो हृदि ।
प्रभावोऽयमनीदृक्षसूनोर्गर्भगतस्य नौ ॥ २६ ॥
इदं हि घटते यस्माद् गर्भवासदिने मुदा ।
वन्दितोऽयं समागत्य सद्भावाभ्यां सुरेश्वरैः ॥ २७ ॥
गतेषु मासेषु नवस्वर्धाष्टदिवसेषु च ।
ज्येष्ठकृष्णत्रयोदश्यां भरणीस्थे निशाकरे ॥ २८ ॥
सूर्यादिषु ग्रहेषूच्चपरमोच्चस्थितेषु च ।
शुभे लग्ने मुहूर्ते च प्रवाते चारु मारुते ॥ २९ ॥
निशीथसमये स्वर्णवर्णं कान्तिसमन्वितम् ।
सा देवी सुषुवे पुत्रं विश्वत्रयसुखावहम् ॥ ३० ॥

(त्रिभिर्विशेषकम्)

अत्रान्तरे षडधिकपञ्चाशद् दिक्कुमारिकाः ।
अवधिज्ञानतो ज्ञात्वा जिनजन्म समाययुः ॥ ३१ ॥
अष्टावेयुरधोलोकाद् गजदन्ताद्रिकन्दतः ।
अष्टौ च नन्दनवनकूटाद् मेरुनगस्थितात् ॥ ३२ ॥
प्रत्येकं रुचकद्वीपादष्टावष्टौ कुमारिकाः ।
एयुर्दिग्भ्यश्चतसृभ्यश्चतस्रश्च विदिग्गताः ॥ ३३ ॥
मध्यमाद् रुचकद्वीपाच्चतस्रश्च दिगङ्गनाः ।
एवं सम्मिलिताः सर्वाः षटपञ्चाशद् भवन्ति ताः ॥ ३४ ॥
संवर्तवातजलदक्षतिं दर्पणधारिताम् ।
भृङ्गारतालवृन्तानां चामराणां च धारणम् ॥ ३५ ॥
दीपिकाधारणं रक्षाविधानप्रभृतीनि च ।
चक्रिरे सूतिकर्माणि क्रमेणैवं जिनस्य ताः ॥ ३६ ॥
अत्रान्तरे सुरेन्द्रस्य चचालाचलमासनम् ।
सम्प्रयुक्तावधिज्ञानो जिनजन्म विवेद सः ॥ ३७ ॥
आज्ञाप्य त्रिदशं नैगमेषिणं हरिणाननम् ।
ज्ञापयामास तद्देवान् घण्टास्फालनपूर्वकम् ॥ ३८ ॥
सर्वे संनह्य देवास्ते हरेरन्तिकमाययुः ।
विमानं कारयामास प्रधानं पालकेन सः ॥ ३९ ॥
तत्राधिरुह्य सपरीवारोऽलङ्कारशोभितः ।
आगादनुपमश्रीको जिनजन्मगृहे हरिः ॥ ४० ॥

तुभ्यं नमस्तीर्थनाथ ! मनाथीकृतविष्टप !
कृपारससरित्राथ ! नाथ ! श्रीविश्वसेनज ! ॥ ४१ ॥
कुक्षौ रत्नधरे ! देवि ! जगद्दीपप्रदायिके !
नमस्तुभ्यं जगन्मातस्त्वं धन्या पुण्यवत्यसि ॥ ४२ ॥
त्वमेवामोघजन्माऽसि त्वमेवोत्तमलक्षणे !
पुत्रिणीषु त्वमेवाऽसि पवित्रा भुवनत्रये ॥ ४३ ॥
धर्मोद्धरणधोरेयस्त्वन्नमोक्षाऽध्वदीपकः ।
षोडशस्तीर्थनाथोऽयं भगवान् सुषुवे यया ॥ ४४ ॥
नत्वा स्तुत्वा जिनाधीशं तदम्बां च विशेषतः ।
दत्त्वावस्वापिनीं तस्याः प्रतिरूपं निवेश्य च ॥ ४५ ॥
पञ्चरूपो बभूवाऽसौ तत्रैको जिनमाददे ।
एकश्छत्रं पवित्रं चैको द्वौ च चामरधारिणौ ॥४६॥ (युग्मम्)
स ययौ मेरुशिखरे सुरेन्द्रा अपरेऽपि हि ।
तत्रैयुः स्वर्गभुवनवासिनो व्यन्तरास्तथा ॥ ४७ ॥
तत्रातिपाण्डुकम्बलशिलायां शाश्वतासने ।
सौधर्मेन्द्रो निषसाद धृत्वाङ्के जिनपुङ्गवम् ॥ ४८ ॥
हेमरूप्यमणिदारुमृन्मयां कलशावलिम् ।
तीर्थगन्धोदकापूर्णामुत्क्षिप्य प्रमदाञ्चिताः ॥ ४९ ॥
अच्युताद्याः सुराधीशाश्चक्रिरे जिनमज्जनम् ।
निःसीमसुकृतापास्तभवाम्भोधिनिमज्जनम् ॥५०॥ (युग्मम्)
ततश्चाच्युतनाथस्त्वोत्सङ्गे संस्थाप्य तीर्थपम् ।
सौधर्मेन्द्रो व्यधात् स्नात्रं पुण्यपात्रं जगद्गुरोः ॥ ५१ ॥

सुवाससा प्रमृज्याङ्गं चन्दनाद्यैर्विलिप्य च ।
पुष्पाद्यैरर्चयामास प्रीतचित्तः शचीपतिः ॥ ५२ ॥
विधाय चक्षुःशान्त्यर्थं लवणोत्तारणादिकम् ।
शक्रो नत्वा जिनं भक्त्या स्तोतुमेवं प्रचक्रमे ॥ ५३ ॥
जय त्वमचिराकुक्षिक्षितिकल्पद्रुसन्निभ ! ।
भव्याम्भोरुहसूर्याभ ! भद्रश्रेणिविधायक ! ॥ ५४ ॥
इत्याद्युद्दामवचनैः स्तुत्वा नीत्वा पुनर्गृहे ।
स मातुरर्पयामास जिनमेवं जगाद च ॥ ५५ ॥
जिनस्य जिनमातुश्च यो दुष्टं चिन्तयिष्यति ।
एरण्डफलवद् ग्रीवे स्फुटिष्यत्यस्य मस्तकम् ॥ ५६ ॥
ततो नन्दीश्वरद्वीपे यात्रां कृत्वा सुरेश्वराः ।
सर्वे निजं निजं स्थानं जग्मुस्ताश्च कुमारिकाः ॥ ५७ ॥
तदा देवी जजागार तदङ्गप्रतिचारिकाः ।
दृष्ट्वा सनन्दनामेतां जातानन्दाः समभ्रमाः ॥ ५८ ॥
प्रस्खलद्गतयो गाढनीवीबन्धशिरोरुहाः ।
पतत्प्रच्छादनाः पुत्रजन्म राज्ञे न्यवेदयन् ॥ ५९ ॥
इदं च कथयामासुः सूतिकर्माऽस्य देव ! यत् ।
चक्रे काष्ठाकुमारीभिर्दासीभिरिव साङ्गसम् ॥ ६० ॥
कृतो जन्माभिषेकश्च सुरेन्द्रैर्मेरुमस्तके ।
इति देवमुखात् स्वामिन्नस्माभिः शुश्रुवे वचः ॥ ६१ ॥
ततोऽभिनवपाथोदधाराहतकदम्बवत् ।
शुशुभे जातरोमाञ्चकञ्चुको जगतीपतिः ॥ ६२ ॥

निजाङ्गलग्नमखिलं भूषणं मुकुटं विना ।
आसप्तसन्ततिं ताभ्यो वृत्तिं च प्रददावसौ ॥ ६३ ॥
ततश्च दापयन् दानमनिवारितशात्रवम् ।
हृष्टः प्रवर्तयामास सुतजन्ममहोत्सवम् ॥ ६४ ॥
द्वादशेऽथ दिने राजा बन्धुवर्गमशेषकम् ।
भोजयित्वा गौरवेण तत्समक्षमदोऽवदत् ॥ ६५ ॥
बभूवाऽग्निवशान्तिर्यदस्मिन् गर्भागते जिने ।
ततस्य सुतरत्नस्य शान्तिर्नामाऽस्तु सुन्दरम् ॥ ६६ ॥
सर्वस्याऽपि जनस्यैतत् सञ्जातं नाम सम्मतम् ।
रम्यं सद्गुणनिष्पन्नं चेतसाग्रे विचिन्तितम् ॥ ६७ ॥
शक्रसंक्रमिताङ्गुष्ठाऽमृताहारस्ततः प्रभुः ।
विशिष्टरूपलावण्यसम्पन्नो ववृधे क्रमात् ॥ ६८ ॥
पाणिपादतले यस्यारक्ते लक्षणलक्षिते ।
स्निग्धताम्रपृथूत्तुङ्गा नखाश्च मुकुरोपमाः ॥ ६९ ॥
पादौ कुर्मोन्नताविणीजङ्घाकारे च जङ्घिके ।
ऊरू करिकरप्रख्ये विस्तीर्णं च कटीतटम् ॥ ७० ॥
गम्भीरदक्षिणावर्ता नाभिर्मध्यं च वज्रवत् ।
पुरद्वारकपाटाभं दृढं वक्षःस्थलं तथा ॥ ७१ ॥
बाहू पुरार्गलातुल्यौ ग्रीवा कम्बुसमा वरा ।
बिम्बोपमौ चाधरोष्ठौ कुन्दकुड्मलवद् द्विजाः ॥ ७२ ॥
उत्तुङ्गः सरलो नासावंशः सज्जनवृत्तवत् ।
पद्मपत्रोपमे नेत्रे अष्टमीन्दुसमालिकम् ॥ ७३ ॥

दोलाकारं श्रुतियुगं कुलाकारं च मस्तकम् ।
स्निग्धा अलिकुलश्यामाः कुन्तलाश्चातिकोमलाः ॥ ७४ ॥
पद्मगन्धसमः श्वासो वरहेमरुचिस्तनुः ।
इत्यङ्गलक्षणं यस्य कुरङ्गश्च तथाऽपरम् ॥ ७५ ॥
त्रिभिर्ज्ञानैः समायुक्तोऽशेषविज्ञानपारगः ।
जातः सर्वजनोत्कृष्टः प्रभुः सम्प्राप्तयौवनः ॥ ७६ ॥
वत्सराणां सहस्रेषु पञ्चविंशतिषु क्रमात् ।
गतेषु भगवान् राज्ये जनकेन निवेशितः ॥ ७७ ॥
परिणायितश्चानेकाः सुरूपाः कुलबालिकाः ।
सकलान्तःपुरीसारा जज्ञे तस्य यशोमती ॥ ७८ ॥
जीवो दृढरथस्याऽथ स सर्वार्थात्परिच्युतः ।
आगाद्यशोमतीकुक्षौ चक्रस्वप्नोपसूचितः ॥ ७९ ॥
समये च सुतो जज्ञे तस्योत्सवपुरःसरम् ।
चक्रायुध इति नाम चक्रे स्वप्नानुसारतः ॥ ८० ॥
कलाकलापसम्पूर्णः क्रमात्सम्प्राप्तयौवनः ।
सोऽपि पाणिग्रहं राजकन्यकानां हि कारितः ॥ ८१ ॥
अन्यदायुधशालायां रविबिम्बसमद्युति ।
तस्योत्पन्नं सहस्रारं चक्ररत्नमनुत्तमम् ॥ ८२ ॥
शस्त्रागारारक्षकेण तदुत्पत्तिर्निवेदिता ।
प्रभोः सोऽथ समागत्य चक्रेऽस्याष्टाह्निकोत्सवम् ॥ ८३ ॥
तच्छालाया विनिर्गत्य चचालाम्बरवर्त्मना ।
तदनु प्राचलच्छान्तिनाथः सैन्यसमन्वितः ॥ ८४ ॥

चक्रं यक्षसहस्रेणाधिष्ठितं तदयो गतम् ।
पूर्वस्यां मागधतीर्थासन्नवेलाकुले क्रमात् ॥ ८५ ॥
कृत्वा निवेशं सेनायास्तत्र चक्री शुभासने ।
निषसादाभिमुखोऽस्य ततस्तदनुभावतः ॥ ८६ ॥
अधोभागे जलस्यान्ते द्वादशयोजनस्थिते ।
मागधाख्यकुमारस्य चलति स्मासनं तदा ॥ ८७ ॥
ददर्शावधिना शान्तिं स जिनं चक्रवर्तिनम् ।
षट्खण्डभरतक्षेत्रसाधनोद्यतमागतम् ॥ ८८ ॥
दध्यौ चैवं मयाऽऽराध्योऽन्योऽपि चक्री जिनस्त्वयम् ।
विशेषेण यतो भक्तिमिन्द्रा अप्यस्य कुर्वते ॥ ८९ ॥
ततः सुवस्त्राण्यादाय सोऽनर्घ्याभरणानि च ।
आगत्य ढौकयामास प्रभोरेवं शशंस च ॥ ९० ॥
तवाज्ञाकारकः स्वामिन् ! पूर्वदिक्पालकोऽस्म्यहम् ।
आदेष्टव्यं सदा कृत्यं स्वकिङ्करसमस्य मे ॥ ९१ ॥
भगवानपि सम्मान्य दैवतं विससर्ज तम् ।
याम्यां प्रतिदिशं सोऽथ चलति स्म सुदर्शनः ॥ ९२ ॥
तीर्थस्य वरदामस्यासन्ने गत्वा स्थितश्च सः ।
तस्याधिष्ठायकं शान्तिस्तथैवासाधयत् प्रभुः ॥ ९३ ॥
गत्वाऽथ वारुणीमाशां प्रभासस्याधिदैवतम् ।
साधयित्वोत्तरस्यां तु ययौ सिन्धुनदीतटे ॥ ९४ ॥
तत्राऽपि पूर्वविधिना साधिता सिन्धुदेवता ।
आगत्याऽऽढौकयत् स्नानपीठं रत्नमयं विभोः ॥ ९५ ॥

शातकुम्भमयाः कुम्भा रौप्या मृन्मयकास्तथा ।
अन्यां च स्नानसामग्रीं सुवस्त्राभरणानि च ॥ ९६ ॥
जचे च सर्वदा स्वामिन्नाज्ञाकारिण्यहं तव ।
इत्युक्त्वा साऽपि स्वस्थानं विसृष्टा विभुना ययौ ॥ ९७ ॥
उत्तीर्य्य चर्मरत्नेन सिन्धुं सेनापतिस्ततः ।
विभूपान्ते साधयित्वा प्रतीचीखण्डमागतः ॥ ९८ ॥
कृतपूजं ततश्चक्रं वैताढ्यस्यागमत्तले ।
वैताढ्याद्रिकुमारश्च वशवर्त्यभवत् प्रभोः ॥ ९९ ॥
गुहाखण्डप्रपाताया द्वारमुद्घाटितं स्वयम् ।
कृतमालसुरस्याज्ञां जगद्भर्तुः प्रपन्नवान् ॥ १०० ॥
तत्रोन्मग्नाऽथ निर्मग्ना द्वे नद्यावतिदुस्तरे ।
चकार वर्धकिः सद्यः पद्यां तत्र मनोहराम् ॥ १ ॥
गुहायां प्रविवेशाऽथ प्रभुः सैन्यसमन्वितः ।
काकिन्याऽथ तमो हर्तुं विदधे मण्डलानि च ॥ २ ॥
पञ्चाशद्योजनान्येकोनपञ्चाशच्च मण्डली ।
एवं जङ्घे ससैन्योऽथ परतो निरगाद् बहिः ॥ ३ ॥
तत्रापातचिलाताख्यान् म्लेच्छान् भरतचक्रिवत् ।
वशे चकार तरसा महापुण्यप्रभावयुक् ॥ ४ ॥
सेनान्या साधयित्वाऽथ द्वितीयं सिन्धुनिष्कुटम् ।
हिमवत्पर्वतस्याधिदेवं साधयति स्म सः ॥ ५ ॥

---

(१) ङ ज विभुः ।

गिरौ वृषभकूटाख्ये निजं नाम लिलेख च ।
गङ्गोत्तरं निष्कुटं चासाधयद् वाहिनीपतिः ॥ ६ ॥
तमिस्रायां नाट्यमालं संसाध्य निरगाद् विभुः ।
गङ्गां च साधयित्वाऽस्याः कूले तस्थाऽथ तस्थुषः ॥ ७ ॥
द्वादशयोजनायामा नवयोजनविस्तृताः ।
मञ्जूषाकृतयः प्रादुर्बभूवुर्निधयो नव ॥ ८ ॥ (युग्मम्)
नैसर्पः पाण्डुकश्चैव पिङ्गलः सर्वरत्नकः ।
महापद्मः कालमहाकालौ माणवशङ्खकौ ॥ ९ ॥
स्कन्धावारपुराटीनां निवेशाः प्रथमे निधौ ।
सर्वेषां धान्यबीजानामुत्पत्तिश्च द्वितीयके ॥ १० ॥
नराणां महिलानां च हस्तिनां वाजिनां तथा ।
आभरणविधिः सर्वो निधौ पिङ्गलके भवेत् ॥ ११ ॥
चतुर्दशाऽपि रत्नान्युत्पद्यन्ते सर्वरत्नके ।
महापद्मे च वस्त्राणां रङ्गादीनां च सम्भवः ॥ १२ ॥
काले कालत्रयज्ञानं महाकाले च कीर्तितः ।
स्वर्णरूप्यलोहमणिप्रवालानां च सम्भवः ॥ १३ ॥
युद्धनीतिः समग्राऽपि सर्वप्रहरणानि च ।
तनुत्राणादि योधानां योग्यं माणवके भवेत् ॥ १४ ॥
तूर्याङ्गानि समस्तानि काव्यं चाऽपि चतुर्विधम् ।
निधौ शङ्खाभिधे नाट्यनाटकयोर्विधिः ॥ १५ ॥
तेषु पल्योपमायुष्का वसन्ति खलु देवताः ।
निधानसमनामानः समये परिकीर्तिताः ॥ १६ ॥

तथैवात्मवशं चक्रे गङ्गायाः पूर्वनिष्कुटम् ।
एवं षट्खण्डभरतक्षेत्रं प्रभुरसाधयत् ॥ १७ ॥
[1]कृतदिग्विजयः सोऽथ पुनरागान्निजं पुरम् ।
प्रविश्य तत्र गेहे च जगामोत्सवपूर्वकम् ॥ १८ ॥
द्वात्रिंशन्मुकुटबद्धमहीपालसहस्रकैः ।
प्राप्तश्चक्रवर्तित्वाऽभिषेको द्वादशाब्दिकः ॥ १९ ॥
अभिषेकोत्सवं कृत्वा राजैकैको दिने दिने ।
स्वामिने प्रचुरं द्रव्यं ददौ हे हे च कन्यके ॥ २० ॥
चतुःषष्टिसहस्राणि ततोऽभूवन् प्रिया विभोः ।
अत्यन्तरूपलावण्यविनिर्जितसुराङ्गनाः ॥ २१ ॥
सेनापतिप्रभृतीनि रत्नानि च चतुर्दश ।
तत्र यक्षसहस्रेणैकैकं हि समधिष्ठितम् ॥ २२ ॥
चतुरशीतिलक्षाणि करिणां वाजिनां तथा ।
ध्वजाङ्काः शस्त्रसम्पूर्णास्तत्प्रमाणा रथा अपि ॥ २३ ॥
द्विसप्ततिसहस्राणि पुराणामृद्धिशालिनाम् ।
ग्रामाणां च पदातीनां कोट्यः षण्णवतिस्तथा ॥ २४ ॥
द्वात्रिंशतं सहस्राणि देशानां भूभुजां तथा ।
द्वात्रिंशद्बद्धतरुणीनाटकानां च रङ्गिणाम् ॥ २५ ॥
रत्नाकराद्याकराणां सहस्राणि च विंशतिः ।
पत्तनान्यष्टचत्वारिंशत्सहस्रमितानि च ॥ २६ ॥

---

(१) ङ ज ञ ट कृतार्द्धविजयः ।

एवं पालयतश्चक्रिपदवीमसमां प्रभोः ।
ययौ वर्षसहस्राणां विंशतिः पञ्चसंयुता ॥ २७ ॥
अत्रान्तरे ब्रह्मलोकेऽरिष्टप्रस्तरवासिनाम् ।
पीठं सारस्वतादीनां चलति स्मामृताशिनाम् ॥ २८ ॥
विज्ञायावधिना तेऽथ व्रतस्य समयं विभोः ।
तीर्थं प्रवर्तयेत्याचचक्षिरे सैन्यबन्दिवत् ॥ २९ ॥
विजानंस्तत् स्वयं स्वामी तैश्चैवं ज्ञापितस्ततः ।
ददौ सांवत्सरं दानं याचकेभ्यो यथारुचि ॥ ३० ॥
ततश्चक्रायुधं राज्ये निवेश्य तनयं निजम् ।
बभूव भगवान् दीक्षाग्रहणार्थं समुद्यतः ॥ ३१ ॥
अत्रान्तरे सुराधीशाः सर्वेऽपि चलितासनाः ।
आययुः शान्तिनाथस्य कर्तुं निष्क्रमणोत्सवम् ॥ ३२ ॥
सर्वार्थसंज्ञां शिबिकामारुरोहाऽथ तीर्थकृत् ।
चामराभ्यां वीज्यमानो धृतच्छत्रश्च मस्तके ॥ ३३ ॥
उत्क्षिप्ता मानुषैः पूर्वं शिबिका सा जगद्गुरोः ।
सुरासुरेन्द्रगरुडनागेन्द्रैश्च ततस्ततः ॥ ३४ ॥
उढूढा सा पुरो देवैर्दक्षिणाङ्गे तथाऽसुरैः ।
पश्चाद्भागे च गरुडैर्नागैरुत्तरतस्तथा ॥ ३५ ॥
नृत्यं प्रकटयन्ति स्म पुरो भगवतो नटाः ।
पठन्ति स्मोच्चकैर्भट्टाः स्वामिन् ! जय जयेति च ॥ ३६ ॥
सद्गुणान् वर्णयन्ति स्मैश्वर्यादीन् भुवनोत्तरान् ।
नानाच्छन्दैर्जगद्गर्तुर्नरा रामकदायकाः ॥ ३७ ॥

ततो भम्भामृदङ्गादीन्यातोद्यानि गुरुस्वरम् ।
वादयन्ति स्म साटोपास्तत्पाठकुशला नराः ॥ ३८ ॥
चक्रे च हाहाहूहूभ्यां सप्तस्वरसमन्वितम् ।
सम्मूर्छनाग्रामलयमात्राढ्यं गीतमुत्तमम् ॥ ३९ ॥
रम्भा तिलोत्तमा चैवोर्वशी मेना सुकेशिका ।
हावभावविलासाढ्यं नृत्यं चक्रुः पुरः प्रभोः ॥ ४० ॥
स एवंविधसामग्र्या निर्गत्य नगराच्छनैः ।
उद्यानं प्रवरं प्राप सहस्राम्रवणाभिधम् ॥ ४१ ॥
शिबिकायाः समुत्तीर्य विमुच्याभरणान्यथ ।
पञ्चभिर्मुष्टिभिः केशानुच्चखान जिनेश्वरः ॥ ४२ ॥
वस्त्राञ्चले गृहीत्वा तान् क्षीराब्धौ मघवाऽक्षिपत् ।
मृदङ्गनादसंयुक्तं तुमुलं च न्यवारयत् ॥ ४३ ॥
ज्येष्ठासितचतुर्दश्यां शशाङ्के भरणीगते ।
कृत्वा सिद्धनमस्कारं प्रभुश्चारित्रमाददे ॥ ४४ ॥
कृतषष्ठतपाः सार्धं सहस्रेण महीभुजाम् ।
आत्तसामायिकः सोऽथ विजहार महीतले ॥ ४५ ॥
कस्मिंश्चित्सन्निवेशेऽथ परमान्नेन कारितः ।
सुमित्राख्यगृहस्थेन पारणं परमेश्वरः ॥ ४६ ॥
चतुर्ज्ञानधरः सोऽथ ग्रामाकरपुराकुलाम् ।
स्वामी विहरति स्मोर्वीं महासत्त्वशिरोमणिः ॥ ४७ ॥
मासान् छद्मस्थकालेऽष्टौ विहृत्य पुनराययौ ।
स हास्तिनपुरे तत्र सहस्राम्रवणे वरे ॥ ४८ ॥

तत्र पत्रप्रसूनादिनन्दिभृन्नन्दिनामकः ।
सुविशालोऽभवद्वृक्षस्तस्थौ तस्य तले प्रभुः ॥ ४८ ॥
प्रभोः प्रवर्तमानस्य शुक्लध्याने वरे तदा ।
कृतषष्ठस्य पौषस्य शुद्धायां नवमीतिथौ ॥ ५० ॥
भरणीस्थे निशानाथे क्षीणकर्मचतुष्टये ।
उत्पन्नमतुलं नित्यं केवलं ज्ञानमुज्ज्वलम् ॥ ५१ ॥ (युग्मम्)
चतुर्विधैस्ततो देवैः समेत्य चलितासनैः ।
अकारि रम्यं समवसरणं जिनहेतवे ॥ ५२ ॥
ऊर्ध्वां योजनमात्रायां वायुनाऽशुभपुद्गलाः ।
अपनीतास्ततो गन्धोदकेन शमितं रजः ॥ ५३ ॥
आद्यो मणिमयो वप्रः कपिशीर्षसमन्वितः ।
द्वितीयश्च हेममयः सुरत्नकपिशीर्षकः ॥ ५४ ॥
सुवर्णकपिशीर्षाङ्कस्तृतीयो रूप्यनिर्मितः ।
विमानज्योतिर्भवनवासिभिस्ते कृताः सुरैः ॥ ५५ ॥
जज्ञे सतोरणा तेषु प्रत्येकं हाश्चतुष्टयी ।
स्वाम्यङ्गाद् द्वादशगुणस्तन्मध्येऽशोकपादपः ॥ ५६ ॥
चत्वारि परितस्तस्य सिंहासनवराणि च ।
कृतत्रयं चामराणि व्यन्तरैर्विहितं ह्यदः ॥ ५७ ॥
प्रविश्य पूर्वद्वारेण कृततीर्थनमस्कृतिः ।
निषसाद प्रसन्नास्यः पूर्वसिंहासने प्रभुः ॥ ५८ ॥
शेषेषु तत्प्रतिच्छन्दाः पृष्ठे भामण्डलं प्रभोः ।
पुरः कुसुमवृष्टिश्चाजानुमात्रा सुरैः कृता ॥ ५९ ॥

नदन्ति स्माम्बरतले देवदुन्दुभयस्तदा ।
अथो निषेदुराग्नेय्यां साधुसाध्वीसुराङ्गनाः ॥ ६० ॥
ज्योतिष्कभवनपतिव्यन्तराणां च देवताः ।
निषेदुर्नैर्ऋते कोणे वायव्ये ते सुराः पुनः ॥ ६१ ॥
वैमानिकामराऽमर्त्यमनुष्याणां च योषितः ।
एते निषेदुरीशाने मुख्यप्राकारमध्यगाः ॥ ६२ ॥
पूर्वोक्तदिग्विभागेषु तिर्यञ्चस्त्यक्तमत्सराः ।
सन्निषण्णा द्वितीयस्य प्राकारस्याऽन्तरेऽखिलाः ॥ ६३ ॥
तस्युस्तृतीयवप्रान्तर्वाहनान्यखिलानि च ।
एवं समवसरणस्थितिः किञ्चित्प्रकीर्तिता ॥ ६४ ॥
कल्याणनामधेयेन पुंसागत्य निवेदिताः ।
स्वामिनः केवलोत्पत्तिश्चक्रायुधमहीपतेः ॥ ६५ ॥
गत्वाऽसौ विधिना तत्र नत्वा स्तुत्वा जिनेश्वरम् ।
निषसाद यथास्थान पुरो विरचिताञ्जलिः ॥ ६६ ॥
मधुक्षीरास्रवलब्ध्या युक्तयानिशयेन च ।
भाषया विदधे धर्मदेशनां भगवानथ ॥ ६७ ॥
निर्जिताः शत्रवो लोके महाराज ! त्वयौजसा ।
नाद्याऽपि निर्जिता देहे रिपवस्त्विन्द्रियाह्वयाः ॥ ६८ ॥
शब्दरूपरसगन्धस्पर्शाख्या विषयाः खलु ।
अजितेष्विन्द्रियेष्वेते महानर्थविधायिनः ॥ ६९ ॥
वितत्य कर्णौ व्याधस्य गीताकर्णनतत्पराः ।
हरिणा मरणं यान्ति श्रोत्रेन्द्रियवशंवदाः ॥ ७० ॥

शलभः कनकाकारां प्रदीपस्योल्लसच्छिखाम् ।
पश्यन् प्रविश्य तत्राऽऽशु म्रियतेऽनिर्जितेक्षणः ॥ ७१ ॥
मांसपेशीरसास्वादलुब्धः कैवर्तवश्यताम् ।
यात्यगाधजलस्थोऽपि मीनो रसनया जितः ॥ ७२ ॥
भृङ्गः करिमदाघ्राणलुब्धः प्राप्नोति पञ्चताम् ।
दुःखं वा सहते नागो घ्राणेन्द्रियवशः खलु ॥ ७३ ॥
हस्तिनीवपुषः स्पर्शलुब्धोऽथ करिपुङ्गवः ।
आलानबन्धनं तीक्ष्णाङ्कुशघातं सहेत भोः ! ॥ ७४ ॥
त्यजन्ति विषयानेवंविधान् सत्पुरुषाः क्षणात् ।
त्यक्ताः प्रियाः स्वरूपेण गुणधर्मेण ते यथा ॥ ७५ ॥
चक्रायुधेन पृष्टोऽथ शान्तिनाथो जिनेश्वरः ।
प्रतिबोधक्रते तस्य कथयामास तत्कथाम् ॥ ७६ ॥
इहामीदृ भरतक्षेत्रे पुरे शौर्यपुराभिधे ।
[1]दृढधर्म इति ख्यातो विक्रान्तः पृथिवीपतिः ॥ ७७ ॥
यथार्थनाम्नी तस्याऽभूत् प्रेयसी शीलशालिनी ।
तत्कुक्षिसम्भवस्तस्य गुणधर्माभिधः सुतः ॥ ७८ ॥
कलावानिन्दुवल्लोकलोचनानन्ददायकः ।
पञ्चबाण इवाशेषकामिनीवल्लभश्च यः ॥ ७९ ॥

---

(१) ङ ञ समन्वितः ।
(२) ङ दृढकर्मः ।

सुभगः सरलः शूरः पूर्वाभाषी प्रियंवदः ।
दृढसौहृदः सुरूपः स सर्वगुणसंयुतः ॥ ८० ॥
इतश्चेशानचन्द्रस्य भूपतेः रूपसंयुता ।
सुता कनकवत्यामीद्दसन्तपुरपत्तने ॥ ८१ ॥
चक्रे तस्याः कृते राज्ञा स्वयंवरणमण्डपः ।
गुणधर्मोऽथ तत्रागादन्ये च पृथिवीभुजः ॥ ८२ ॥
राज्ञा दत्तगृहे स्थित्वा स स्वयंवरमण्डपम् ।
ययौ द्रष्टुमथो तत्रागमत् साऽपि नृपात्मजा ॥ ८३ ॥
तया निरीक्षितः सोऽथ तेनासावपि वीक्षिता ।
जाता च दृष्टिविक्षेपेणानुरागपरात्मनि ॥ ८४ ॥
तमीक्षमाणा सानन्दं दृष्ट्या सा सदनं ययौ ।
कुमारोऽपि वलित्वाऽगात् स्वावासे सपरिच्छदः ॥ ८५ ॥
निश्युपान्ते कुमारस्य चेट्येका प्रेषिता तया ।
तस्मै समर्पयामास सैकां चित्रस्य पट्टिकाम् ॥ ८६ ॥
ददर्श तत्र लिखितां कुमारः कलहंसिकाम् ।
तदधः श्लोकमेकं च ततो वाचयति स्म तम् ॥ ८७ ॥
आदौ दृष्टे प्रिये सानुरागासौ कलहंसिका ।
पुनस्तद्दर्शनं शीघ्रं वाञ्छत्येव वराक्यहो ! ॥ ८८ ॥
कुमारोऽथ पुरस्तस्या लिखित्वा कलहंसकम् ।
तस्याधस्तादिति श्लोकं लिलेख च महामतिः ॥ ८९ ॥
कलहंसोऽप्यसौ सुभ्रु ! क्षणं दृष्ट्वाऽनुरागवान् ।
पुनरेव प्रियां द्रष्टुमहो ! वाञ्छत्यनारतम् ॥ ९० ॥

कुमारीप्रेषिते साऽथ सुताम्बूलविलेपने।
कुमारस्यार्पयामास सुगन्धकुसुमानि च ॥ ९१ ॥
कुमारेणाऽपि बद्धानि कुसुमान्युत्तमाङ्गके।
ताम्बूलमुपभुक्तं च न्यस्तमङ्गे विलेपनम ॥ ९२ ॥
पारितोषिकमेतस्यै दत्तो हारश्च निर्मलः।
सोवे कुमार! कन्यायाः शृणु त्वं वाचिकं ननु ॥ ९३ ॥
कृत्वैकान्तमसौ तच्च श्रोतुमभ्युद्यतोऽभवत्।
साऽवोचद्राजनन्दन्या तयेदं कथितं तव ॥ ९४ ॥
करिष्ये वरमालाया निक्षेपं ते प्रगे परम्।
किञ्चित्कालं न विषयसेवा कार्या त्वया प्रिय! ॥ ९५ ॥
प्रतिपन्नमिदं तेन तया तस्या निवेदितम्।
प्रभाते च निचिक्षेप तत्कण्ठे साऽथ तां स्रजम् ॥ ९६ ॥
विसृष्टास्तेऽथ संमान्य भूभुजानेन पार्थिवाः।
कारितो गुणधर्मश्च कन्यकायाः करग्रहम् ॥ ९७ ॥
श्वशुरं समनुज्ञाप्य गृहीत्वा प्रेयसीं च ताम्।
स्वपुरे स समागत्य तां सुमोचालये वरे ॥ ९८ ॥
अथान्येद्युः समीपेऽस्या निषण्णः स नृपात्मजः।
ब्रूहि प्रहेलिकां काञ्चिदित्युक्तश्चानयाऽवदत् ॥ ९९ ॥
स्थले जाता जले खैरं याति तेन न पूर्यते।
जनप्रतारिणी नित्यं वद सुन्दरि! का त्वसौ ॥ २०० ॥
विचिन्त्य कनकवत्योक्तम् 'तरी' इति ॥ तया चापाठि ;—
पयोधरभराक्रान्ता तन्वङ्गी गुणसंयुता।

नरस्कन्धसमारूढा का प्रयात्यवलम्बिता ? ॥ १ ॥

कुमारेणोक्तम्—कावाकृतिः ॥

क्षणं विनोदं कृत्वैवं कलावत्या तया सह ।
गुणधर्मकुमारः स्वप्रासादं पुनरागतः ॥ २ ॥
स्नातभुक्तविलिप्तस्याऽऽस्थानस्थस्याऽस्य सन्निधौ ।
परिव्राडाययावेकः प्रतीहारनिवेदितः ॥ ३ ॥
तेन दत्तासनोऽप्येनं स्वकाष्ठासनसंस्थितम् ।
प्रणामपूर्वं पप्रच्छागमहेतुं नृपात्मजः ॥ ४ ॥
माऽवदद्भैरवाचार्येणाऽहं भद्र ! नियोजितः ।
तवाह्वानकृते कार्यं स एव कथयिष्यति ॥ ५ ॥
क्वाऽस्यसौ भैरवाचार्यः कुमारेणेति जल्पिते ।
सोऽब्रवीदमुकस्थाने नगराद्बहिरस्त्यसौ ॥ ६ ॥
अहं प्रातः समेष्यामीत्युक्तस्तेन ययावसौ ।
पपाठात्रान्तरे तस्य पुरः कालनिवेदकः ॥ ७ ॥
अयं प्राप्योदयं पूर्वं स्वप्रतापं वितत्य च ।
गततेजा अहो ! सम्प्रत्यस्तं याति दिवाकरः ॥ ८ ॥
सन्ध्याकालोचितं कृत्यं कृत्वाऽथ नृपनन्दनः ।
समतिक्रमयामास यामिनीं सुखनिद्रया ॥ ९ ॥

पुनः कालनिवेदकेन पठितम् ;—

निहतप्रतिपक्षोऽसौ सर्वसत्त्वोपकारकृत् ।
उदयं याति तिग्मांशुरन्योऽप्येवं प्रतापवान् ॥ १० ॥

उत्थाय गुणधर्मोऽथ प्रातःकृत्यं विधाय च ।
प्रययौ भैरवाचार्यसमीपे सपरिच्छदः ॥ ११ ॥
व्याघ्रकृत्तिनिषण्णोऽसौ कुमारेण निरीक्षितः ।
लगयित्वा शिरो भूमौ भक्तिपूर्वं च वन्दितः ॥ १२ ॥
ससम्भ्रमः स योगीन्द्रो दर्शयित्वा स्वमासनम् ।
त्वमप्युपविशाऽत्रेति कुमारं समभाषत ॥ १३ ॥
विनीतात्मा कुमारस्तं प्रत्यूचे भगवन् ! न मे ।
गुरोः समासने युक्तमुपवेष्टुं कदाचन ॥ १४ ॥
स्वपदात्युत्तरीयेऽथोपविश्यैवं जगाद सः ।
प्रभो ! त्वया कृतार्थोऽहं कृतोऽभ्येत्य पुरे स्वयम् ॥ १५ ॥
योग्यप्यूचे कुमार ! त्वं मान्योऽसि मम सर्वदा ।
परं निष्किञ्चनोऽस्म्येष स्वागतं किं करोमि ते ? ॥ १६ ॥
कुमारोऽप्यब्रवीदाशीर्वाद एव भवादृशाम् ।
स्वागतस्य क्रियाऽस्माकमित्युक्ते सोऽवदत् पुनः ॥ १७ ॥
भक्तिः प्रेम प्रियालापः संमानं विनयस्तथा ।
प्रदानेन विना लोके सर्वमेतद् न शोभते ॥ १८ ॥
कुमारः पुनरप्यूचे सम्यग्दृष्टयावलोकनम् ।
सम्यगान्नाप्रदानं च विश्राणनमिदं हि वः ॥ १९ ॥
अथाऽभाषिष्ट योगीन्द्रो भद्र ! मल्लोऽस्ति मे वरः ।
चक्रे तस्याऽष्ट वर्षाणि मया जापपरिश्रमः ॥ २० ॥
तस्य विघ्नप्रतिघातं यद्येकरजनीं भवान् ।
करोति तदयं सर्वः प्रयासः सफलो भवेत् ॥ २१ ॥

सोऽवदत्तन्मया कार्यं ब्रूत कस्मिन् दिने प्रभो ! ।
योगी स्माहासितचतुर्दश्यां प्रेतवने निशि ॥ २२ ॥
खड्गव्यग्रकरेणैकाकिना राजसुत ! त्वया ।
आगन्तव्यमहं तत्र स्थास्याम्यात्मचतुर्थकः ॥ २३ ॥ (युग्मम्)
एवमस्त्विति जल्पित्वा कुमारः स्वगृहं गतः ।
चतुर्दश्यां च यामिन्यां तथा तत्र ययावसौ ॥ २४ ॥
कुमारो योगिनाऽभाणि भविष्यन्ति विभीषिकाः ।
तत्त्वया रक्षणीयोऽहमेते चोत्तरसाधकाः ॥ २५ ॥
कुमारोऽवोचत स्वस्थः कुरु मन्त्रस्य साधनम् ।
को नाम कर्तुं विघ्नं ते समर्थो मयि रक्षके ॥ २६ ॥
कृत्वाऽथ मण्डलं तत्र स्थापितो योगिना शवः ।
प्रज्वाल्य वह्निं तस्याऽऽस्ये चक्रे होमविधिस्ततः ॥ २७ ॥
पूरयन्निव दिक्चक्रं गगनं स्फोटयन्निव ।
निर्घातोऽभूद् गुरुतरो विश्वं बधिरयन्निव ॥ २८ ॥
संजाताऽथ द्विधा धात्री तेन रन्ध्रेण निर्गतः ।
कालः करालः पातालाद् नर एकोऽतिभीषणः ॥ २९ ॥
ऊचे च किमरे ! पाप ! दिव्यकान्ताभिलाषुकः ।
क्षेत्रपालोऽत्र विज्ञातो मेघनादस्त्वया नहि ॥ ३० ॥
मम पूजामकृत्वा त्वं मन्त्रसिद्धिं समीहसे ।
एषोऽपि राजतनयस्त्वयार्यो विप्रतारितः ॥ ३१ ॥
इत्युक्त्वा सिंहनादं सो विदधे तज्जिघांसया ।
त्वयोऽपि योगिनः शिष्या निपेतुस्ते महीतले ॥ ३२ ॥

सोऽथ प्रोक्तः कुमारेण रे[1] ! त्वं गर्जसि किं वृथा ? ।
विद्यते तव शक्तिश्चेत्तद्युध्यस्व मया सह ॥ ३३ ॥
कुमारोऽप्यमुचत् खड्गं तं निरीक्ष्य निरायुधम् ।
प्रचण्डभुजदण्डाभ्यां तौ युद्धं चक्रतुस्ततः ॥ ३४ ॥
युध्यमानोऽथ स क्षेत्रपालो बलवता क्षणात् ।
कुमारेण समाक्रान्तो वज्रसारस्वबाहुना ॥३५ ॥
सोऽथ तुष्टोऽब्रवीत् साधो ! निर्जितोऽहं त्वया खलु ।
याचस्व रुचितं किञ्चिद्यत्ते सम्पादयाम्यहम् ॥ ३६ ॥
जगादैवं कुमारस्तं विमुच्य स्वभुजग्रहात् ।
चेत्सिद्धोऽसि कुरु त्वं तद्योगिनोऽस्य समीहितम् ॥ ३७ ॥
प्रोक्तं क्षेत्राधिपेनास्य यथेप्सितफलप्रदः ।
सिद्धः सर्वोत्तमो मन्त्रो माहात्म्येन तवैव हि ॥ ३८ ॥
ततः स्वं वाञ्छितं ब्रूहि येन तत्पूरयाम्यहम् ।
महाभाग्य ! भवेद्यस्मादमोघं देवदर्शनम् ॥ ३९ ॥
कुमारेण ततोऽभाणि यद्येवं तत्तथा कुरु ।
यथा मे वशमायाति भार्या कनकवत्यसौ ॥ ४० ॥
ज्ञात्वा ज्ञानेन सोऽवादीद् भाविनी सा वशे तव ।
नूनं कामितरूपेण तच्च भावितवानथ ॥ ४१ ॥
एवं दत्त्वा वरं तस्याऽदृश्योऽभूत् क्षेत्रपालकः ।
सिद्धमन्त्रः स योगीन्द्रः कुमारं प्रशशंस च ॥ ४२ ॥

---

(१) ज भोः ।

स्मर्तव्योऽहं त्वया भूयः परोपकृतिकर्मठ ! ।
इत्युदित्वा निजं स्थानं शिष्यैः सह ययावसौ ॥ ४३ ॥
प्रक्षाल्याङ्गं कुमारोऽपि प्रविवेश निजं गृहम् ।
सुष्वाप तत्र शय्यायां [1]वीरवेषं विमुच्य तम् ॥ ४४ ॥
द्वितीयदिनयामिन्या आद्ययामे गते सति ।
अदृश्यरूपवान् सोऽथ प्रियायाः सदनं ययौ ॥ ४५ ॥
ददर्श तत्र कनकवतीं चेटीद्वयान्वितां ।
एवमूचे च सा दास्यौ कियन्माना निशा हले ! ॥ ४६ ॥
ताभ्यामूचे न चाद्याऽपि पूर्यते प्रहरद्वयी ।
वर्त्तते तत्र गमनवेला स्वामिनि ! संप्रति ॥ ४७ ॥
ततः स्नातविलिप्ताङ्गी वस्त्रालङ्करणाञ्चिता ।
देवावाससमानं सा विमानं निर्ममे क्षणात् ॥ ४८ ॥
तत्राधिरुह्य दासीभ्यां सह यावच्चचाल सा ।
तद् दृष्ट्वा गुणधर्मोऽपि दध्यौ तावत् सविस्मयः ॥ ४९ ॥
अहो ! विमानमनया खेचर्येव कृतं कथम् ।
अत्रारुह्य क्वियामायां क्वत्र चैषा प्रयास्यति ॥ ५० ॥
अथवा किं विकल्पेनाऽदृश्यरूपोऽनया सह ।
गत्वाऽहमपि वीक्षे तद् यत् करोत्यसकौ खलु ॥ ५१ ॥
इति ध्यात्वा विमानैकदेशेऽध्यारुह्य सोऽचलत् ।
उत्तराभिमुखं तच्च गत्वा दूरमवातरत् ॥ ५२ ॥

---

(१) ज ञ पुरावेषं ।

महासरोवरासन्ने तत्राशोकवनान्तरे ।
एको विद्याधरस्तेन कुमारेण निरीक्षितः ॥ ५३ ॥
विमानमध्यान्निःसृत्य कुमारस्य प्रियाऽथ सा ।
कृत्वा प्रणाममेतस्य समीपे समुपाविशत् ॥ ५४ ॥
अन्याश्च योषितस्तिस्रस्तत्रागत्य प्रणम्य तम् ।
निषेदुस्तत्र चान्येऽपि खेचराः समुपाययुः ॥ ५५ ॥
तस्याऽभूद् वनखण्डस्यैशान्यां दिशि मनोहरम् ।
विशालं निर्मलं श्रीमदृषभादिजिनमन्दिरम् ॥ ५६ ॥
सुवर्णमणिसोपानं भूरिस्तम्भसमुच्छ्रितम् ।
विमानमिव देवानां तद्विभाति स्म[1] भूस्थितम् ॥ ५७ ॥
क्षणान्तरेण सर्वाणि जग्मुस्तानि जिनालये ।
प्रारब्धः खेचरैस्तत्र जैनस्नात्रमहोत्सवः ॥ ५८ ॥
ऊचेऽथ खेचरेन्द्रेण कस्या नृत्येऽद्यवारकः ।
तन्नमाकर्ण्य कनकवत्युत्तस्थौ क्षणेन सा ॥ ५९ ॥
संयम्य परिधानं स्वं रङ्गभूमौ प्रविश्य च ।
भावभावकृती दत्ता चक्रे नृत्यविधिं वरम् ॥ ६० ॥
अन्यासां तिसृणां मध्याद्वीणावादनमेकका ।
वेणुतालावादनं च चक्रुर्दत्ताः क्रमेण ताः ॥ ६१ ॥
गुणधर्मकुमारोऽप्यदृश्यरूपः सविस्मयः ।
तत्रैकत्र स्थितः सर्वं तत्स्वरूपं व्यलोकयत् ॥ ६२ ॥

---

(१) महीस्थितम् ।

तदा च कनकवत्या नृत्यन्त्या न्यपतद्भुवि ।
सुवर्णकिङ्किणीमाला त्रुटित्वा कटिसूत्रकम् ॥ ६३ ॥
शीघ्रमेव कुमारेण प्रच्छन्नं जगृहे सका ।
आलोकिता न च प्राप्ता रङ्गस्यान्ते तया ततः ॥ ६४ ॥
स्वं स्वं स्थानं ययुः सर्वेऽप्यगात् कनकवत्यपि ।
निजावासं सचेटीका कुमारोऽपि तथैव सः ॥ ६५ ॥
सा तस्थौ स्वगृहे तच्च विमानं संहृतं तया ।
रात्रिशेषे कुमारोऽपि सुप्त्वापागत्य मन्दिरे ॥ ६६ ॥
मतिसागरसंज्ञस्य सख्युः पुत्रस्य मन्त्रिणः ।
किङ्किणीमालिका साऽथ कुमारेणार्पिता प्रगे ॥ ६७ ॥
इयं भद्र ! प्रियाया मेऽर्पणीया समये त्वया ।
शिक्षां दत्त्वेति तत्याज्ञं ययौ तेन सहैव सः ॥ ६८ ॥
अभ्युत्थानं विधायास्य दत्तमासनमेतया ।
कुमारो न्यषदत्तत्र तस्योपान्ते सखा च सः ॥ ६९ ॥
सारिक्रीडां प्रकुर्वत्या कुमारो विजितस्तया ।
किञ्चिद्ग्रहणकं नाथ ! सारयेत्युदितं ततः ॥ ७० ॥
तेनावलोकितं वक्त्रं सख्युः सोऽपि समार्पयत् ।
किङ्किणीमालिकां तस्याः कृत्वा निवसनान्तरात् ॥ ७१ ॥
दृष्ट्वा सोचे मदीयेयं युवाभ्यां क्षुद्रघण्टिका ।
क्व सम्प्राप्ता कुमारोऽथावादीत् कुत्र पपात ते ? ॥ ७२ ॥
स्थानं सम्यग् न जानामि तयेत्युक्ते नृपात्मजः ।
उवाच मम मित्रोऽयं महानैमित्तिकः प्रिये ! ॥ ७३ ॥

पातस्थानं तवैतस्याः कथयिष्यति निश्चितम् ।
पृष्टस्तया सोऽप्यवादीत् श्वोऽहं कथयितास्मि ते ॥ ७४ ॥
अथोत्थाय समायातः कुमारो निजमन्दिरम् ।
पुनस्तथैव तच्चैत्ये ययौ रात्रौ तया सह ॥ ७५ ॥
वीणाया वादनं तस्याः कुर्वत्याः पतितं तदा ।
कथञ्चिद् नूपुरं पादात् कुमारेणाऽऽदृते च तत् ॥ ७६ ॥
तदप्यन्विष्य बहुधा सा स्वगेहं समागता ।
अर्पयामास तदपि मित्रस्य नृपनन्दनः ॥ ७७ ॥
द्वितीयेऽहनि तद्गेहे सोऽथ मित्रसमन्वितः ।
प्रययावुपविष्टश्च तया दत्तासने प्रभुः ॥ ७८ ॥
शास्त्रगोष्ठीं क्षणं कृत्वा तया स मतिसागरः ।
पृष्टो निरूपितं भद्र ! किं निमित्तं त्वया वद ? ॥ ७९ ॥
सोऽथावादीन्निमित्तस्य बलेन ननु वेद्म्यहम् ।
तवान्यदपि तन्वङ्गि! नष्टं किञ्चिद् विभूषणम् ॥ ८० ॥
ततः साशङ्कचित्ताऽपि सावहित्था जगाद सा ।
किं तद्विभूषणं नाम निमित्तज्ञ ! निवेदय ॥ ८१ ॥
किं त्वं स्वयं न जानासीत्युक्ता भर्ताऽब्रवीत् पुनः ।
जानामि न पुनस्तस्य पातस्थानं स्मराम्यहम् ॥ ८२ ॥
कुमारोऽवददन्येन केनचित् कथितं मम ।
दूरं गतायास्त्वत्पत्न्या नूपुरं च्युतमित्यहो ! ॥ ८३ ॥
तद्येन जगृहे सुभ्रु ! विज्ञातः स मया नरः ।
गृहीतं नूपुरं तच्च तस्य हस्ताद् बलादपि ॥ ८४ ॥

दध्यौ कनकवत्येवं प्रयोगेणेह केनचित् ।
मङ्क्ष्यति मम वृत्तान्तो नूनं सर्वोऽपि वीक्षितः ॥ ८५ ॥

अथवा

चुरभद्रं कला चान्द्री चौरिका क्रीडितानि च ।
प्रकटानि तृतीयेऽह्नि स्युश्चत्रं सुकृतानि च ॥ ८६ ॥
विचिन्त्यैवमभाषिष्ट तन्मञ्जीरं क्व मे प्रिय ! ।
समर्पितं च तत्तस्यास्तन्मित्रेण तदाज्ञया ॥ ८७ ॥
ततश्च सा पुनः स्माह सत्यमाख्याहि कान्त ! मे ।
इदं त्वया क्व सम्प्राप्तं सोऽवदत् पतितं क्व ते ? ॥ ८८ ॥
यत्र स्थाने पपातेदं तद् दृष्टं भवता न वा ।
स तस्या इति पृच्छन्त्या भूयोऽनिष्टोत्तरं व्यधात् ॥ ८९ ॥
सोचे स्वयं त्वया दृष्टं तत्स्थानं यदि तद्वरम् ।
तन्मेऽग्निनाऽपि नो शुद्धिर्यद्यन्येन निवेदितम् ॥ ९० ॥
एवमुक्त्वाऽसकौ वामकरन्यस्तशिरोधरा ।
चिन्तया विगतोत्साहा बभूवाधोमुखी क्षणात् ॥ ९१ ॥
हासयित्वा कुमारस्तां परिहासस्य वार्तया ।
गतो निजगृहं रात्रौ तथैव पुनराययौ ॥ ९२ ॥
सा सख्याऽवान्तरेऽभाणि वेलातिक्रामति स्फुटम् ।
रोषं विद्याधरः कर्त्ता स्वामिन्येवं विचिन्तय ॥ ९३ ॥
ततो दीर्घं विनिश्वस्य तयैवं परिभाषितम् ।
सख्येतद्विषमं कार्यं मन्दभाग्या करोमि किम् ? ॥ ९४ ॥

यतः प्रवर्त्तमानाऽहं कुमारीत्वे पितुर्गृहे ।
तेन विद्याधरेन्द्रेण शपथं कारिता ह्यमुम् ॥ ९५ ॥
मयाऽनुज्ञातया कान्तः सेवनीयस्त्वया खलु ।
[1]आगन्तव्यं तथावश्यं निश्युपान्ते सदा मम ॥ ९६ ॥
पित्रोर्मयोपरोधेनाऽनुरागेण च राजसूः ।
तदूढाऽभिमतश्चाऽभूत् तस्याऽहमपि सम्मता ॥ ९७ ॥
कथञ्चित्तत्र गच्छन्ती ज्ञाताऽहमनुना सखि ! ।
सोऽपि विद्याधरोऽनेन साक्षादेव विलोकितः ॥ ९८ ॥
ततो मे वल्लभस्तेन खेचरेण हनिष्यते ।
हन्ताऽथवा खेचरो मामित्याशङ्कां करोम्यहम् ॥ ९९ ॥

अन्यच्च —

नवीनयौवनारम्भो बह्वपायः प्रवर्तते ।
उत्तमे च मम ख्याते पित्रश्वशुरयोः कुले ॥ ३०० ॥
अत्यन्तविषमो लोको यद्वा तद्वा प्रजल्पति ।
कार्याणां गहनत्वेनाकुलीभूताऽस्मि सर्वथा ॥ १ ॥
सोचे स्वामिनि ! यद्येवं तिष्ठ त्वं तत्र याम्यहम् ।
सखी मेऽपटुदेहाऽस्तीत्याख्यास्यामि तदग्रतः ॥ २ ॥
अथो कनकवत्याख्यदेवं कुरु शुभाशये ! ।
इत्युक्त्वाऽपयति स्माऽस्या विमानं विरचय्य सा ॥ ३ ॥

---

(१) अ विमानारूढया पार्श्वे समागन्तव्यं च मे निशि ।

तस्मिन्नारुह्य सा दासी ययौ तत्र तया सह ।
गुणधर्मकुमारोऽपि चिन्तयन्निति मानसे ॥ ४ ॥
अद्य तस्याऽपनेष्यामि ध्रुवं विद्याधरेशताम् ।
गुर्वीं च प्रेक्षणश्रद्धां जीवलोकनिवासिनाम् ॥ ५ ॥
प्रारब्धं खेचरैः स्नात्रमथ श्रीमज्जिनेशितुः ।
चेटी विमानादुत्तीर्य्य प्राविशत् सा जिनालये ॥ ६ ॥
कुमारोऽपि तथैवाऽस्थाच्छत्रः सर्वं विलोकयन् ।
एकेन खेचरेणैवं चेटिका सा प्रजल्पिता ॥ ७ ॥
किमद्य महती वेला लग्ना ते स्वामिनी क्व वा ।
साऽपि क्रुत्वोत्तरं पूर्वमूचेऽहं प्रेषिता तया ॥ ८ ॥
तच्छ्रुत्वा खेचरेन्द्रोऽसौ कोपेन स्फुरिताऽधरः ।
प्रोवाच कुरुत स्नात्रं भो यूयं वृषभप्रभोः ॥ ९ ॥
अहं त्वस्याश्चिकित्सामि पापिष्ठायाः शरीरकम् ।
इत्युक्त्वा दासचेटीं तां मूर्धजेष्वग्रहीदमौ ॥ १० ॥
कुमारोऽपि परिकरं बबन्ध निबिडं तदा ।
खड्गं च प्रगुणीचक्रे भग्नश्च प्रेक्षणोत्सवः ॥ ११ ॥
ऊचे विद्याधरश्चेटीं तवादौ रुधिरेण मे ।
उपशाम्यतु कोपाग्निः पश्चाद् युक्तं करिष्यते ॥ १२ ॥
तत्त्वं स्मराभीष्टदेवं पञ्चत्वसमयेऽधुना ।
प्रतिपद्यस्व शरणं तं च यः प्रतिभाति ते ॥ १३ ॥
सावादीदेष सर्वज्ञो देवासुरनरार्चितः ।
अभीष्टदेवो भगवान् स्मृतः श्रीवृषभो मया ॥ १४ ॥

शरणं च ममाटव्यामस्यां मरणमेव भोः ! ।
विद्यते कोऽपि न त्राता तथाऽप्येवं भणाम्य'हो ! ॥ १५ ॥
शूरो धीरो महोदारो वैरिद्विपघटाहरिः ।
ममाऽस्तु शरणं नित्यमार्यपुत्रो गुणैकभूः ॥ १६ ॥
जजल्प खेचरः कोऽयमार्यपुत्रो वदाधमे ! ।
दध्यौ कुमारोऽप्यसुना साधु दृष्टं ममाऽपि यत् ॥ १७ ॥
सन्देहो वर्तते चित्ते ततश्चेटी जगाद सा ।
ततः समक्षं भूपानां स्वामिन्या यः स्वयंवरे ॥१८॥ (युग्मम्)
येन दृष्टः क्षणार्धेन त्वं पाप ! न भवस्यरे ! ।
गुणधर्मकुमारोऽसौ शरणं विहितो मया ॥ १९ ॥
तरवारिमथोद्यम्य स तां हन्तुं समुद्यतः ।
विकोशीकृतखड्गेन कुमारेणेति जल्पितः ॥ २० ॥
विस्रस्ते व्याकुले दीने बालहद्दाबलाजने ।
प्रहरन्ति यके पापा ध्रुवं ते यान्ति दुर्गतिम् ॥ २१ ॥
स्त्रीहत्यापातकं कर्तुमुद्यतस्य तवाऽद्य रे ! ।
अहमेव भविष्यामि प्रायश्चित्तविधौ गुरुः ॥ २२ ॥
स्मित्वा विद्याधरोऽथाख्यत् तत्र गत्वाऽपि यो मया ।
हन्तव्यः स्वयमेवाऽसौ मरणायाययावहो ! ॥ २३ ॥
ततो युद्ध्वा च्छलं लब्ध्वा तस्य विद्याधरेशितुः ।
गुणधर्मकुमारेण शिरश्छिन्नं महौजसा ॥ २४ ॥

---

(१) ज—स्यहम् ।

भयभीतं च तत्सैन्यं तेनैवाश्वासितं गिरा ।
अत्रान्तरे च बालास्तास्तिस्रोऽप्यूचुरिदं वचः ॥ २५ ॥
वयं विमोचिताः स्वामिन्नेतस्मात् खेचरात् त्वया ।
जन्तवः सुप्रसन्नेन गुरुणा पातकादिव ॥ २६ ॥
भवन्त्यस्तनयाः कस्य कुमारस्येति पृच्छतः ।
एका प्रोवाच तन्मध्याद्राज्ञः शङ्खपुरेशितुः ॥ २७ ॥
सुता दुर्लभराजस्य नाम्ना कमलवत्यहम् ।
मयैनैतस्य मयका विवाहो नेप्सितः खलु ? ॥ २८ ॥
कुमारोऽवोचत भयं स्नेहजं कोपजं नु वा ।
साऽवदत् कोपजं तद्धि स्नेहजं तु कुतो यतः ॥ २९ ॥
अहं हि कुट्टिमतलादनेनाऽपहृता पुरा ।
ततः स्वरसनाच्छेदं कुर्वत्येवं प्रजल्पिता ॥ ३० ॥
रमणः प्रतिपत्तव्यस्त्वयावश्यं मदुक्तया ।
आगन्तव्यं समीपे मे यामिन्यां सर्वदा तथा ॥ ३१ ॥
भविष्यति विमानं ते सुशीलाया ममाज्ञया ।
यद्येवं कुरुषे तत्त्वां विमुञ्चामि न हन्म्यहम् ॥ ३२ ॥
कृत्वा शपथनिर्बन्धं प्रतिपन्नं मयाऽपि तत् ।
अनेन शिक्षिता चाऽस्मि साधो ! नृत्यादिकाः कलाः ॥३३॥
एवमन्या वशेऽनेन कृतास्तिस्रो नृपात्मजाः ।
त्वया विनिघ्नता ह्येनं सर्वासां विहितं सुखम् ॥ ३४ ॥
इति श्रुत्वा कुमारेण स्वस्थानं प्रेषिता इमाः ।
स च स्वप्रेयसीवेश्म चेट्या सह समाययौ ॥ ३५ ॥

तं दृष्ट्वा कनकवत्या पृष्टा दासी यथा हले ! ।
हतोऽद्य मम कान्तेन दुष्टविद्याधरः स किम् ? ॥ ३६ ॥
ततश्च तद्बोधोदन्तस्तया तस्या निवेदितः ।
स्वभर्तृपौरुषोत्कर्षमाकर्ण्य मुमुदे च सा ॥ ३७ ॥
गुणधर्मकुमारोऽथ कृत्वा वार्तां तया सह ।
तत्रैव शर्वरीशेषे सुष्वाप स्नेहनिर्भरः ॥ ३८ ॥
विद्याधरस्य तस्याऽथाऽनुजेन क्रुद्धचेतसा ।
उत्पाट्य सोऽर्णवेऽक्षेपि मुक्त्वा चान्यत्र तत्प्रियाम् ॥ ३९ ॥
लब्ध्वा फलहकं किञ्चित् समरात्रेण सोऽम्बुधेः ।
आससाद तटं तत्राऽद्राक्षीत्तापसमेककम् ॥ ४० ॥
ततश्च सममेतेन स गतस्तापसाश्रमम् ।
ददर्श तत्र कनकवतीं स निजवल्लभाम् ॥ ४१ ॥
कुमारोऽथ कुलपतेः समीपे विहितानतिः ।
निषण्णो भणितस्तेन भद्रेयं किमु ते प्रिया ? ॥ ४२ ॥
आमिति भणिते तेन सोऽब्रवीच्च दिनादितः ।
अतिक्रान्ते तृतीयेऽह्नि संप्राप्ता काननाऽन्तरे ॥ ४३ ॥
उद्बध्य तरुशाखायामात्मानं मर्तुमुद्यताम् ।
इमिकामहमद्राक्षं त्वद्वियोगेन सुन्दर ! ॥ ४४ ॥ (युग्मम्)
छित्त्वा पाशं मया सेयं कथञ्चिद्रक्षिता मृतेः ।
त्वदागतिं ज्ञानबलाद् ज्ञात्वाऽऽख्याय च तोषिता ॥ ४५ ॥
कदल्यादितरुफलैः प्राणवृत्तिं विधाय तौ ।
रात्रौ सुषुपतुस्तत्र विविक्तेऽथ लतागृहे ॥ ४६ ॥

भूयोऽप्युत्प्लाव्य खेटेन प्रक्षिप्तौ तौ महार्णवे ।
संप्राप्तफलकौ तीरमासाद्य मिलितौ पुनः ॥ ४७ ॥
कुमारोऽवोचदेतानि विधेर्विलसितान्यहो ! ।
विषयाऽऽसक्तचित्तानां विपदो वा न दुर्लभाः ॥ ४८ ॥
अनेनैव विरागेण त्यक्ताऽशेषपरिग्रहाः ।
निर्ममत्वा महासत्त्वास्तपः कुर्वन्ति साधवः ॥ ४९ ॥
अथो कनकवत्यूचे नाथ ! त्वं सति पौरुषे ।
विषादं किं करोष्यद्याऽनाप्तमर्त्यफलोऽसि यत् ॥ ५० ॥
दीनोद्धारो न विदधे नैकच्छत्रा कृता मही ।
विषया नोपभुक्ताश्च प्रकामं खिद्यसेऽङ्ग ! किम् ? ॥ ५१ ॥
ततस्तस्य गिरा रात्रौ जाग्रता तेन खेचरः ।
स आगतो निर्जितश्च जीवन् मुक्तो महात्मना ॥ ५२ ॥
अनुज्ञाप्य कुलपतिं स गतः क्वाऽपि पत्तने ।
सूरिं तद्धरिरद्राक्षीद्गुणरत्नमहोदधिम् ॥ ५३ ॥
तं नत्वा सप्रियोऽप्येष मोहनिद्रानिवारिणीम् ।
शुश्राव देशनां पुण्यपादपारामसारणीम् ॥ ५४ ॥
सूरिं नत्वाऽन्यतो गत्वा स जगाद विरागवान् ।
प्रियेऽस्य सद्गुरोः पार्श्वे प्रव्रज्या गृह्यतेऽधुना ॥ ५५ ॥
विषयेष्वविरक्ता सा जगादाद्यापि नौ नवम् ।
यौवनं वर्त्तते कान्त ! तद् व्रतं क्रियते कथम् ? ॥ ५६ ॥
सोऽवदद्दृढभावेऽपि केषाञ्चिद्विषयैषिता ।
दृश्यते यौवनस्थानामप्यन्येषां विरागिता ॥ ५७ ॥

पृष्ट्वा किञ्चिदतिशयज्ञानिनं स्वावमानताम् ।
विज्ञाय च यथायुक्तं कार्यमित्युक्तवत्यसौ ॥ ५८ ॥
गुणधर्मोऽथ तद्वाक्यमङ्गीकृत्याऽविशत् पुरे ।
किञ्चिद् भोजनमानेतुं तस्थौ तत्रैव सा पुनः ॥ ५९ ॥
तदा च गुणचन्द्राख्यो राजपुत्रः समागतः ।
वनस्थां यौवनस्थां तां दृष्ट्वा जज्ञेऽनुरागवान् ॥ ६० ॥
इत्युवाच च नम्राऽङ्गि ! काऽसि त्वं केन हेतुना ।
तिष्ठस्येकाकिनी बाले ! किं ते भर्ता न विद्यते ? ॥ ६१ ॥
विज्ञाय साऽनुरागं तं विरक्तं च निजं पतिम् ।
साऽप्याख्याय स्ववृत्तान्तं जाता तदनुरागिणी ॥ ६२ ॥
प्रार्थनातत्परं तं च साऽभाषत कथञ्चन ।
[1]वञ्चयित्वा स्वभर्तारमेष्यामि तव मन्दिरम् ॥ ६३ ॥
इत्युक्तः स ययौ स्वौको गुणधर्मोऽत्र पत्तने ।
दुरोदरक्रीडया स्वमर्जयामास किञ्चन ॥ ६४ ॥
कारयित्वा गृहीत्वाऽथ मण्डकान् स समागतः ।
उद्याने प्रियया सार्धं विदधे भोजनं ततः ॥ ६५ ॥
चिन्तया शून्यचित्तत्वाद्राज्ञा विलिखनेन च ।
इङ्गितज्ञः कुमारोऽसावन्यासक्तां विवेद ताम् ॥ ६६ ॥
अथोत्थाय वनस्यान्ते बडलत्वो भ्रमन्नसौ ।
[2]दृष्टः केनाऽपि किं राजपुत्रोऽद्याप्यत्र तिष्ठति ॥ ६७ ॥

---

(१) ज भर्त्तारं वञ्चयित्वाहमेष्यामि ।
(२) ज पुंभिः केनेति दृष्टः किमस्त्यद्याऽप्यत्र राजसूः ॥ ६७ ॥

कोऽसौ राजसुत इति गुणधर्मस्य पृच्छतः ।
[1]सोऽवदद् गुणचन्द्राख्यो राजसूनुरिहाऽऽगमत्॥ ६८ ॥
कयाचिद्योषिता सार्धं सोऽभूद्दार्त्तापरायणः ।
अहं तदाज्ञयाऽन्यत्र गत्वाऽऽयातोऽस्मि सुन्दर ! ॥ ६९ ॥
तत्पृच्छामि भवन्तं किं गता सा तस्य मन्दिरे ? ।
गतेत्युक्ता कुमारोऽपि पुरुषं विससर्ज तम् ॥ ७० ॥
दध्यौ च नोपकारेण नौजसा हन्त ! योषितः ।
गृह्यन्ते न कुलं शीलं मर्य्यादां गणयन्ति च ॥ ७१ ॥
रहो न जायते यावत् क्षणं प्रार्थयिता न च ।
सतीत्वं तावदेवासां नारीणां नारदोऽब्रवीत् ॥ ७२ ॥
ततस्तां मातुलगृहे मुक्ताऽऽसन्नपुरस्थिते ।
स समीपे मुनीन्द्राणां तेषामेवाऽभवद् व्रती ॥ ७३ ॥
ततश्चोग्रं तपः कृत्वा मृत्वा गत्वा सुरालयम् ।
संप्राप्य च मनुष्यत्वं निर्वाणं समवाप्स्यति ॥ ७४ ॥
मन्दिराद् मातुलस्याऽथ सा [2]निर्गत्य कथञ्चन ।
गुणचन्द्रकुमारस्य प्रिया कनकवत्यभूत् ॥ ७५ ॥
तदन्यगेहिनीदत्तगरलेन विपद्य सा ।
रौद्रध्यानवती प्राप्ता चतुर्थ्यां नरकावनौ ॥ ७६ ॥
उद्वृत्य नरकादेषा भ्रमिष्यति भवं चिरम् ।
एवं ददाति विषयप्रमादो नृपतेऽसुखम् ॥ ७७ ॥

॥ इति गुणधर्मकनकवतीकथानकम् ॥

---

(१) ङ स आख्यद् । (२) ङ ज ञ निःसृत्य ।

कषायविषये राजन् ! नागदत्तकथानकम् ।
तीर्थं यद्वर्धमानस्य भावि तत् कथयामि ते ॥ ७८ ॥
जम्बूद्वीपस्य भरतेऽस्मिन् वसन्तपुरे वरे ।
समुद्रवसुदत्ताख्यावभूतां वणिजौ वरौ ॥ ७९ ॥
द्वावप्यनुद्धतावल्पकषायौ सरलाशयौ ।
चक्रतुर्व्यवहारं तौ मैत्रीभावयुतौ समम् ॥ ८० ॥
यत्किञ्चित् प्रकरोत्येकः कार्यं तदितरेण च ।
इत्येकयोगकारित्वाद् निश्चयो वर्तते तयोः ॥ ८१ ॥
अन्यदोद्यानसंप्राप्तौ मुनीन्द्रं तावपश्यताम् ।
वज्रगुप्ताऽभिधं धर्ममाचक्षाणं सभान्तरे ॥ ८२ ॥
तं नमस्कृत्य तत्पार्श्वे श्रुत्वा धर्मं शुभाशयौ ।
प्रतिपन्नौ सुसाधुत्वं तौ परित्यक्तबन्धनौ ॥ ८३ ॥
कृत्वा संलेखनामन्तेऽनशनं प्रतिपद्य तौ ।
विपद्य त्रिदिवं प्राप्तौ तत्राऽपि प्रीतिशालिनौ ॥ ८४ ॥
यः पूर्वमावयोर्मध्याच्च्यवते सोऽपरेण हि ।
संस्मार्यः सर्वदा धर्मे संकेतमिति चक्रतुः ॥ ८५ ॥ (युग्मम्)
जीवः समुद्रदत्तस्य च्युत्वाऽत्र भरतावनौ ।
पुरे धारानिवासे सागरदत्तेभ्यमन्दिरे ॥ ८६ ॥
भार्यायां धनदत्तायाः कुक्षिजो वररूपवान् ।
श्रीनागदेवतादत्तवरेण समभूत् सुतः ॥ ८७ ॥ (युग्मम्)
नागदत्ताऽभिधानोऽसौ द्विसप्ततिकलान्वितः ।
गान्धर्वे निरतस्तेन जातस्तत्पूर्वनामकः ॥ ८८ ॥

वीणावाद्येऽतिदक्षश्च गारुडे कुशलोऽथ सः ।
अन्यस्मिन् दिन उद्याने क्रीडति स्म सुहृद्युतः ॥ ८८ ॥
वसुदत्तसुरेणैष बहुधा प्रतिबोधितः ।
न किञ्चिद् मन्यते देवस्ततश्चैवं व्यचिन्तयत् ॥ ८० ॥
अत्यन्तसुखितो नाऽयं तावद्धर्मं करिष्यति ।
न यावत् पातितः कष्टे प्राणसंशयकारिणि ॥ ८१ ॥
विचिन्त्यैवं मुने रूपं धृतसर्पकरण्डकम् ।
स रजोहरणमुखवस्त्रिकारहितं व्यधात् ॥ ८२ ॥
पप्रच्छ नागदत्तस्तं यान्तमासन्नवर्त्मना ।
एतेषु त्वत्करण्डेषु विद्यते भो नरेन्द्र ! किम् ? ॥ ८३ ॥
सर्पा इत्युदिते तेन सोऽब्रवीत्तर्हि तानहम् ।
क्रीडयिष्यामि नागांस्तु मदीयान् क्रीडय त्वकम् ॥ ८४ ॥
वार्तिकोऽप्यवदद् वार्ता न कर्तव्या त्वयेदृशी ।
शक्याः क्रीडयितुं नैते यन्मदीया महोरगाः ॥ ८५ ॥
देवानामपि दुर्ग्राह्यांस्त्वमेतान् ननु बालकः ।
ग्रहीष्यसि कथं मूढ ! मन्त्रौषधिबलं विना ॥ ८६ ॥
नागोऽभाषत पश्य त्वं गृह्यमाणानिमान् मया ।
त्वं मे हीत्वा गृहाणादौ सोऽवोचद् मुच्यतामिति ॥ ८७ ॥
नागदत्तेन मुक्तास्ते लगन्ति स्म न तत्तनौ ।
लग्ना वा देवशक्तित्वात् कुर्वन्ति स्म व्यथां नहि ॥ ८८ ॥
गान्धर्वनागदत्तोऽथ जजल्पैवं समत्सरः ।
मुञ्च त्वमपि सर्पान् स्वान् रे ! विलम्बयसेऽत्र किम् ? ॥८९॥

मेलय स्वजनान् सर्वान् नृपं च कुरु साक्षिकम् ।
इति गारुडिकेनोक्ते नागदत्तस्तथाऽकरोत् ॥ ४०० ॥
जगादोच्चैःस्वरं तेषां पुरो गारुडिकध्रुवः ।
भूत्वाऽवहितचित्ता भो ! यूयं शृणुत मद्वचः ॥ १ ॥
गान्धर्वनागदत्तो मे सर्पैः क्रीडितुमिच्छति ।
यद्यसौ दश्यते तैस्तद् देयो दोषो न सर्वथा ॥ २ ॥
स्वजनैर्वारितो नैष विरराम यदा तदा ।
मुमोच परितस्तस्य पन्नगान् सोऽहिवाहकः ॥ ३ ॥
जजल्प च महाक्रूरा ममैते हन्त ! जिह्मगाः ।
अमीषां नाम माहात्म्यं प्रत्येकं कथयामि च ॥ ४ ॥
आरक्तनयनः क्रूरो द्विजिह्वो विषपूरितः ।
क्रोधाभिधानः पूर्वस्यामादिमोऽयं सरीसृपः ॥ ५ ॥
अयमष्टफटाटोपभीषणः स्तब्धवर्ष्मकः ।
याम्यायां यमसंकाशो मानो नाम महोरगः ॥ ६ ॥
वञ्चनाकुशला वक्रगमना पश्चिमाश्रिता ।
इयं मायाह्वया नागी धर्तुं केनेह शक्यते ? ॥ ७ ॥
अयं हि दिशि कौबेर्यां लोभो नाम भुजङ्गमः ।
समुद्र इव दुष्पूरो दष्टो येन भवेद् नरः ॥ ८ ॥
य एतैर्दश्यते प्राणी चतुर्भिरपि पन्नगैः ।
पतत्यधः स नियमादालम्बनविवर्जितः ॥ ९ ॥
गान्धर्वनागदत्तोऽथ तमूचे किमु निष्फलम् ? ।
करोषि वाचां विस्तारं मुञ्च शीघ्रमिमानरे ! ॥ १० ॥

ततस्तेन विनिर्मुक्तैर्मन्त्रौषध्यनिवारितैः ।
दष्टः श्रेष्ठिसुतो नागैश्चतुर्भिरिमकैः समम् ॥ ११ ॥
पपात च धरापीठे तन्मन्त्रैर्विविधौषधैः ।
लेभे कृतोपचारोऽपि चेतनां नेषदप्यसौ ॥ १२ ॥
अमुं जीवापयेत्युक्तस्तद्बन्धुभिरुवाच सः ।
ततो जीवत्यसौ हंहो ! कुर्याच्चेदुष्करक्रियाम् ॥ १३ ॥
अहमप्यग्रितोऽभूवममीभिर्दुष्टपन्नगैः ।
एतद्विषनिरासार्थं करोम्येवंविधां क्रियाम् ॥ १४ ॥
लुञ्चामि [1]सकलान् केशान् मुखशीर्षविनिर्गतान् ।
श्वेतानि सप्रमाणानि वासांसि निवसामि च ॥ १५ ॥
विविधं च तपःकर्म चतुर्थादि करोम्यहम् ।
भुञ्जेऽतिरुक्षमाहारं तपःपारणकेऽप्यहो ! ॥ १६ ॥
अत्याहारं न गृह्णामि पिबामि विरसं पयः ।
उद्देति तद्विषं भूयो यद्येवं न करोम्यहम् ॥ १७ ॥
कदाचित् काननस्याऽन्तः कदाचित् पर्वतोपरि ।
तिष्ठाम्यहं कदाचिच्च शून्यागारश्मशानयोः ॥ १८ ॥
सहे परीषहान् सम्यग् मध्यस्थो द्वेषरागयोः ।
एवं क्रियां कुर्वतो मे भवेद् नो विषविक्रिया ॥ १९ ॥
स्तोकाहारोऽल्पनिद्रश्च यो भवेन्मितभाषकः ।
न केवलममी तस्य वशे स्युस्त्रिदशा अपि ॥ २० ॥

---

(१) ङ ज ञ निखिलान् ।

किं बहूक्तेन यद्येवंविधया क्रिययाऽसकौ ।
संतिष्ठते यतो जीवत्यन्यथा म्रियते ध्रुवम् ॥ २१ ॥
क्रियां कर्तेति लोकेन भणितेऽमरवार्तिकः ।
आलिख्य मण्डलं विद्यामुच्चचारेति पावनीम् ॥ २२ ॥
सर्वसिद्धान् नमस्कृत्य महाविद्यास्तथाऽखिलाः ।
वक्ष्ये दण्डविधिमहं विषवेगविनाशनम् ॥ २३ ॥
प्राणातिपातमनृतमदत्तस्वं च मैथुनम् ।
परिग्रहं च सकलं यावज्जीवं विवर्जयेः ॥ २४ ॥
अनया विद्यया स्वाहायुक्तया स महेभ्यसूः ।
निद्राक्षय इवोत्तस्थौ प्रभावेन दिवौकसः ॥ २५ ॥
स्वजनैर्वार्तिकादिष्टा क्रिया तस्य न्यवेद्यत ।
अश्रद्दधत् स तां गेहाऽभिमुखः प्राचलद् द्रुतम् ॥ २६ ॥
पपात च क्षणात् पृथ्व्यां पुनर्निर्नष्टचेतनः ।
पुनः प्रार्थनया स्वानामुल्लाघो मरुता कृतः ॥ २७ ॥
एवं तृतीयवेलायां विहिते गाढनिश्चये ।
गान्धर्वनागदत्तोऽपि तस्य वाक्यममन्यत ॥ २८ ॥
देवो नीत्वा तमुद्याने सुरत्वं स्वं निवेद्य च ।
तस्याचख्यौ पूर्वभवं सोऽपि जातिं ततोऽस्मरत् ॥ २९ ॥
एवं प्रत्येकबुद्धोऽसौ संजातो मुनिपुङ्गवः ।
तं वन्दित्वाऽमरः सोऽपि जगाम स्थानमात्मनः ॥ ३० ॥
चतुरोऽपि कषायाऽहीन् नियम्याङ्कुशकरण्डके ।
रक्षयामास स मुनिर्यत्नान्निर्गच्छतो बहिः ॥ ३१ ॥

एवं गच्छति कालेऽसावुत्पाद्य वरकेवलम् ।
महानन्दपदं प्राप हत्वा कर्मसमुच्चयम् ॥ ३२ ॥

॥ इति गान्धर्वनागदत्तकथा ॥

एवमादिप्रमादोऽयं पञ्चधाऽपि विवेकिभिः ।
हेयोऽनर्थकरो धर्मो विधेयश्च चतुर्विधः ॥ ३३ ॥
यतिश्रावकभेदाभ्यां पुनरेव द्विधा भवेत् ।
यतिधर्मश्च दशधा ज्ञेयो भेदैः क्षमादिभिः ॥ ३४ ॥
सम्यक्त्वं प्रथमं तत्र द्वैधं त्रैधं चतुर्विधम् ।
पञ्चधा दशधा [1]चैव ज्ञेयं सूत्रानुसारतः ॥ ३५ ॥
अणुव्रतानि पञ्च स्युर्गुणपूर्वं व्रतत्रयम् ।
शिक्षापदानि चत्वारीत्युक्तो धर्मो ह्यगारिणाम् ॥ ३६ ॥
स्थूलप्राणातिपातस्य विरतिव्रतमादिमम् ।
जायते सुखदं पाल्यमानं तद्यमपाशवत् ॥ ३७ ॥
तथाहि—
इहैव भरते वाराणस्यां दुर्मर्षणो नृपः ।
बभूव कमलश्रीश्च तत्प्रिया कमलानना ॥ ३८ ॥
सुमञ्जरीति विख्यातस्तत्राऽभूद् दण्डपाशिकः ।
यमपाशश्च चाण्डालो जात्या नैव च कर्मणा ॥ ३९ ॥
नलदामा वणिक् तत्र दयादिगुणसंयुतः ।
सुमित्रा गेहिनी तस्य मन्मणश्च सुतोऽभवत् ॥ ४० ॥
अन्यदा वणिगानीततुरङ्गे सोऽथ भूपतिः ।

(१) ङ चैतद् ।

आरूढोऽधिष्ठितश्चाश्वो नृपवैरिसुरेण सः ॥ ४१ ॥
उत्पत्य गगनेनैव वेगेनेयाय काननम् ।
राज्ञा मुक्तो विमुक्तश्च प्राणैरप्याशु सोऽश्वकः ॥ ४२ ॥
तत्रैको हरिणो भूपं दृष्ट्वा जातिस्मरोऽभवत् ।
एवमज्ञापयत् तं च लिखित्वाऽग्रेऽक्षरावलीम् ॥ ४३ ॥
देवलो नाम ते राजन्[1]भूवं श्रीकरीधरः ।
मृत्वार्तध्यानदोषेण जातस्तिर्यक्त्वदूषितः ॥ ४४ ॥
तेनाऽथ दर्शितं नीरं दूषितस्य महीपतेः ।
स्वस्थीभूतेऽथ तस्मिंस्तु तत्र तत्सैन्यमाययौ ॥ ४५ ॥
हरिणोऽसौ कृतज्ञेन राज्ञा नीतो निजं पुरम् ।
राजदत्ताभयस्तत्र स्वेच्छया संचचार सः ॥ ४६ ॥
अन्यदा मन्मणस्याष्टे स समागात् परिभ्रमन् ।
पूर्वजन्ममत्सरेण वणिक् तस्मै चुकोप सः ॥ ४७ ॥
तातमूचे च मार्योऽयमपराधकरो मृगः ।
सोऽवदद्धन्यते जीवो [2]नापरोऽपि वणिक्कुले ॥ ४८ ॥
अयं तु भूपतेरिष्टो न हन्तव्यः सुत ! त्वया ।
तथापि निहतो रोषाद् व्याक्षिप्तस्यास्य सोऽमुना ॥ ४९ ॥
कुर्वन् कर्मेदृगं सोऽथ मन्मणः श्रेष्ठि[3]नैच्चितः ।
दूरस्थितेन यमदण्डेने[4]वान्तविधायिना ॥ ५० ॥

---

(१) ज बभूव । (२) ज नाचारोऽपि ।
(३) ङ नैच्यत ।
(४) ज—न चान्तावसायिना ॥ ५० ॥

ततो निवेदितस्तेन तद्वृत्तान्तो महीपतेः ।
कोऽत्र साक्षीति राज्ञोक्ते सोऽवदज्जनकोऽस्य हि ॥ ५१ ॥
नृपाहूतेन तेनाऽपि तत्सत्यमिति जल्पितम् ।
ततोऽसौ सत्यवादीति पूजितः पृथिवीभुजा ॥ ५२ ॥
वधार्थं मन्त्रिणस्याथ समादिष्टो महीभुजा ।
यमपाशोऽब्रवीद् देव ! नहि हिंसां करोम्यहम् ॥ ५३ ॥
कथं त्वं प्राणिनो हिंसां मातङ्गोऽपि करोषि न ।
इति पृष्टोऽवनीशेन स आख्याति स्म कारणम् ॥ ५४ ॥
हस्तिशीर्षे पुरवरे दमदन्तो वणिक्सुतः ।
अनन्ततीर्थकृत्पार्श्वे श्रुत्वा धर्ममभूद् व्रती ॥ ५५ ॥
तपः प्रकुर्वतस्तस्य लब्धयोऽनेकशोऽभवन् ।
गीतार्थो विहरन्नेकः स नगर्यामिहाययौ ॥ ५६ ॥
तस्थौ पिप्पलवनोपान्ते कायोत्सर्गेण च स्थिरः ।
इतश्च तनयो मेऽस्ति प्रभो ! नाम्नाऽतिमुक्तकः ॥ ५७ ॥
औपसर्गिकरोगार्तो गतः पिप्पलवनेऽथ सः ।
मुनिं ननाम नीरोगस्तस्य शक्त्या बभूव च ॥ ५८ ॥
मम तेन स्ववृत्तान्तो गृहमेत्य निवेदितः ।
ततोऽहं सकुटुम्बोऽपि तत्राऽगां रोगपीडितः ॥ ५९ ॥
मुक्तश्च व्याधिना तेन ततोऽहं श्रावकोऽभवम् ।
यावज्जीवं च हिंसाया विरतोऽस्मि धरापते ! ॥ ६० ॥
तेनैव साधुना देव ! प्रतिबोधकथा निजा ।
आख्याता मम पृष्टेन ततोऽहमपि वेद्मि ताम् ॥ ६१ ॥

ततश्च पूजितो हृष्टचेतसा स महीभुजा ।
चाण्डालानां समस्तानामधिपश्च विनिर्मितः ॥ ६२ ॥
अन्येन खपचेनाऽयं मन्मणो विनिपातितः ।
यमपाशश्च मृत्वान्ते बभूव त्रिदशोत्तमः ॥ ६३ ॥
॥ प्राणातिपातविरतिविषये यमपाशमातङ्ककथानकम् ॥
द्वितीयं च व्रतं नाम कन्यालीकादि पञ्चधा ।
अलीकभाषणे दोषो भद्रस्येव प्रजायते ॥ ६४ ॥
क्षितिप्रतिष्ठितपुरे वणिजौ धनवर्जितौ ।
दुष्टबुद्धिसुबुद्धाख्यावभूतां [1]विदितौ जने ॥ ६५ ॥
प्रपन्नसौहृदावेतौ किञ्चिदादाय पण्यकम् ।
देशान्तरप्रचलितावर्थोपार्जनहेतवे ॥ ६६ ॥
प्राप्तौ च क्रमयोगेण पुरे क्वाऽपि पुरातने ।
दिनानि कतिचित्तत्र तस्थतुर्लाभकाङ्क्षिणौ ॥ ६७ ॥
देहचिन्ताकृते क्वापि खण्डीकसि सुबुद्धिना ।
उपविष्टेन संप्राप्तं निधानं किञ्चिदन्यदा ॥ ६८ ॥
तद्दुष्टबुद्धिना सार्धं गृहीत्वाऽसौ न्यभालयत् ।
यावत्तावच्च दीनारसहस्रं समजायत ॥ ६९ ॥
कृतकृत्यौ ततश्चैतावागतौ नगरं निजम् ।
तत्रेदं मन्त्रयामास दुष्टः सह सुबुद्धिना ॥ ७० ॥
अर्धमर्धं विभज्येदं गृह्णीवश्चेद्वनं सखे ! ।
तदा संभावना गुर्वी भविष्यत्यावयोर्जने ॥ ७१ ॥

(१) ङ जिनशासने ।

ततो निदानलाभं नौ ज्ञात्वा भूपः कथञ्चन ।
तद्ग्रहीष्यति दारिद्र्यं तदवश्यं तदावयोः ॥ ७२ ॥
गृहीत्वा शतमेकैकं शेषद्रव्यमिहैव हि ।
निक्षिप्यते वटोपान्ते संमतं तव चेद् भवेत् ॥ ७३ ॥
एवमस्त्विति तेनोक्ते रात्रौ निक्षिप्य तत्र तत् ।
प्रभाते तौ निजं गेहमेयतुर्मुदिताशयौ ॥ ७४ ॥
तद्दीनारशतमथो दुष्टबुद्धेरसद्व्ययात् ।
निष्ठितं दिवसैः कैश्चित् पुण्येनैव स्थिरेन्दिरा ॥ ७५ ॥
पुनः सुबुद्धिदुर्बुद्धी गत्वा निशि ततो धनात् ।
दीनारशतमेकैकं गृहीत्वा गृहमागतौ ॥ ७६ ॥
अन्यदा चिन्तयामास दुष्टबुद्धिर्मनस्यदः ।
सुबुद्धिं वञ्चयित्वैनं शेषं स्वं स्वीकरोम्यहम् ॥ ७७ ॥
विचिन्त्येवं स यामिन्यां गत्वा तत्र तदाददे ।
वञ्च्यते जनकोऽप्यर्थलुब्धैरन्यस्य का कथा ? ॥ ७८ ॥
मित्रमूचे च तद् द्रव्यं विभज्यानीयते गृहम् ।
बहिःस्थिते च नो तस्मिंश्चिन्ता नौ याति चित्ततः ॥ ७९ ॥
तदाक्यमनुमेनेऽथ सुबुद्धिः सरलाशयः ।
गत्वा चखान तत् स्थानं सह तेन च दुष्टधीः ॥ ८० ॥
तत्राऽपश्यन् धनं तच्च स कूटकपटालयः ।
हा ! वञ्चितोऽस्मि केनाऽपीत्याजघान शिरोऽश्मना ॥ ८१ ॥
जगाद च त्वया तद्धि सुबुद्धेऽपहृतं खलु ।
जानाति नाऽपरः स्थानमिदमावाभ्यां विना यतः ॥ ८२ ॥

सोऽब्रवीद् हर्तुकामः स्वमभविष्यमहं यदि ।
एकान्तलब्धं तत्ते नाकथयिष्यं पुराऽप्यदः ॥ ८३ ॥
त्वं तु स्ववञ्चकत्वेन मामप्येवं विमन्यसे ।
पित्तातिप्लाविते नीरमपि ज्वलितमीक्षते ॥ ८४ ॥
एवं तौ कलहायन्तौ समीपे नृपतेर्गतौ ।
इति विज्ञपयामास तमादौ सोऽथ दुर्मतिः ॥ ८५ ॥
देवावाभ्यां निधिः क्वापि लब्धस्तेन निवेदितः ।
लुब्धाभ्यामसुकस्थाने निक्षिप्तश्च भिया तव ॥ ८६ ॥
अनेन वञ्चयित्वा मां जगृहे स सुबुद्धिना ।
इति ज्ञात्वा यथायुक्तं विधेहि त्वं महीपते ! ॥ ८७ ॥
राजोचे वर्ततेऽत्रार्थे साक्षिको ननु कस्तव ।
विचिन्त्य सोऽवदद् दुष्टबुद्धिः पुनरिदं वचः ॥ ८८ ॥
यस्याऽधस्तादिनिक्षिप्तं तद् द्रव्यमवनीपते ! ।
स एव हि महाद्वृक्षः साक्षिकोऽस्यत्र निश्चितम् ॥ ८९ ॥
इदं वित्तमनेनात्तमिति वाक्यमसौ यदि ।
तरुर्वक्ति ततो राजन् ! ज्ञेयः सूनृतवागहम् ॥ ९० ॥
राजा प्रोवाच यद्येवं करिष्यसि कथञ्चन ।
सत्यवाक्यो भवानेको भविष्यति ततो जने ॥ ९१ ॥
इदं हि ह्यो मया कार्यमित्युक्ते दुष्टबुद्धिना ।
विसृष्टौ तौ नरेन्द्रेण दत्तप्रतिभुवौ गृहम् ॥ ९२ ॥
अहो ! सुदुर्घटं कार्यं कथमेष करिष्यति ।
धर्मस्यैव जयो वेति ध्यायन् वेश्म ययौ सुधीः ॥ ९३ ॥

इतरोऽपि गृहं प्राप्तो भद्राख्यं पितरं निजम् ।
प्रोवाच तात ! दीनारा मम हस्तगता इमे ॥ ९४ ॥
क्षेप्स्यामि त्वामहं नीत्वा निशायां वटकोटरे ।
आत्तं सुबुद्धिना रिक्थमिति वाच्यं त्वया प्रगे ॥ ९५ ॥
सोऽथाभाषिष्ट रे दुष्टमते ! नैतद्धि सुन्दरम् ।
उपरोधेन ते पुत्र ! कार्यमेतद् मया परम् ॥ ९६ ॥
चक्रे च स तथा तेन द्वितीयेऽह्नि महीपतेः ।
पुरः पौरजनस्यापि तमर्चित्वा महीरुहम् ॥ ९७ ॥
दुष्टबुद्धिरदोऽवादीद् गृहीतं केन तद्धनम् ।
सत्यमाख्याहि वृक्षेश ! विवादस्त्वयि तिष्ठते ॥ ९८ ॥ (युग्मम्)
वटकोटरसंस्थोऽथ भद्रश्रेष्ठी शशंस सः ।
हंहो ! सुबुद्धिनोपात्तं तद् द्रव्यमिति बुध्यताम् ॥ ९९ ॥
तच्छ्रुत्वा विस्मिताः सर्वे सुबुद्धिं चावदद् नृपः ।
अपराध्यसि भोस्तावद् निधानं मे समर्पय ॥ ५०० ॥
सोऽथ दध्यौ न तरवो जल्पन्तीह कदाचन ।
इयं हि कूटरचना दुष्टबुद्धेर्विभाव्यते ॥ १ ॥
वटस्य कोटराद्वाणी यदासौ निर्गता ततः ।
मन्ये संकेतितोऽनेन प्रच्छन्नोऽस्त्यत्र कश्चन ॥ २ ॥
जगाद च तवावश्यमर्पणीयं मया धनम् ।
महाराज ! परं किञ्चिदिज्ञप्यमिह विद्यते ॥ ३ ॥
ततो विज्ञपयेत्युक्तो राज्ञाऽवोचदसौ पुनः ।
जगृहे तद् मया द्रव्यं न नीतं हि गृहे परम् ॥ ४ ॥

तरुकोटरमध्येऽत्र प्रक्षिप्याऽहं गतो गृहम् ।
अन्यस्मिन् दिवसे यावत्तदादातुमुपागतः ॥ ५ ॥
तावत्तत्राऽहिमद्राक्षं फटाटोपभयङ्करम् ।
देवताधिष्ठितमिदमिति चाऽचिन्तयं तदा ॥ ६ ॥ (युग्मम्)
तत्तं द्विरसनं द्रव्यगोप्तारं देव ! हन्म्यहम् ।
उपायेनेह केनापि यद्यनुज्ञा भवेत्तव ॥ ७ ॥
एवं कुर्विति राज्ञोक्ते स सद्यस्तरुकोटरम् ।
तर्पणैः पूरयामास बहिश्च परितोऽस्य हि ॥ ८ ॥
ततो ज्वलयितुं वह्निावारब्धे द्रुगणोद्भवः ।
बभूव प्रचुरो धूमस्तेन भ्रष्टेक्षणः क्षणात् ॥ ९ ॥
दुष्टबुद्धिः पिता सोऽथ पपात पृथिवीतले ।
भद्रश्रेष्ठीति भूपेन लोकैश्चाप्युपलक्षितः ॥ १० ॥ (युग्मम्)
किमेतदिति पृष्टश्च सर्वैरपि सकौतुकैः ।
सोऽवदत् कूटसाक्षित्वमहं दुष्टेन कारितः ॥ ११ ॥
अलीकवाक्यजं पापमिहैव फलितं मम ।
इति ज्ञात्वा न वक्तव्यमहो ! केनाप्यसूनृतम् ॥ १२ ॥
ततोऽसौ संस्थितो भद्रो भद्रधीः सोऽथ तत्सुतः ।
राज्ञा सर्वस्वमादाय पुराद् निर्वासितो निजात् ॥ १३ ॥
सुबुद्धिस्त्वर्चितस्तेन वस्त्रालङ्करणादिभिः ।
सत्यत्वात् सर्वलोकस्य प्रशंसां समवाप सः ॥ १४ ॥
असत्यमिह लोकेऽपि ज्ञात्वैवं दुःखकारणम् ।
तत्त्वया परिहर्तव्यं चक्रायुध ! महीपते ! ॥ १५ ॥

॥ असत्यविषये भद्रश्रेष्ठिकथानकम् ॥

स्थूलादत्तपरित्यागसंज्ञमेतदणुव्रतम् ।
पालनीयं प्रयत्नेन गुणज्ञजिनदत्तवत् ॥ १६ ॥
वसन्तपुरमित्यस्ति पुरं पुरगुणाञ्चितम् ।
यथार्थनामा तत्राऽभूद् जितशत्रुर्धरापतिः ॥ १७ ॥
तनयो जिनदासस्य जिनदत्तोऽभिधानतः ।
बभूव श्रावकस्तत्र जीवाऽजीवादितत्त्ववित् ॥ १८ ॥
संप्राप्तयौवनः सोऽथ दीक्षाऽऽदानकृताशयः ।
विवाहं कुलकन्याया नेच्छति स्माऽर्थितोऽपि सन् । ॥१९॥
मित्रमण्डलसंयुक्तो ययौ चोपवनेऽन्यदा ।
उत्तुङ्गशिखरं तत्राद्राक्षीच्च जिनमन्दिरम् ॥ २० ॥
ततोऽसौ विधिना तत्र प्रविश्य कुसुमादिभिः ।
समभ्यर्च्य जिनाधीशं विदधे चैत्यवन्दनाम् ॥ २१ ॥
आगत्य कन्यकैकाथोत्तरीयपिहिताननाः ।
शुभद्रव्यैर्जिनाऽर्चायाश्चकार मुखमण्डनम् ॥ २२ ॥
कपोले जिनबिम्बस्य पत्रवल्लीं वितन्वतीम् ।
तां वीक्ष्य विस्मितोवाच जिनदत्तः सखीनिति ॥ २३ ॥
कस्येयं तनया हंहो ! तेऽवोचन् विदिता न किम् ? ।
तवेयं प्रियमित्रस्य सार्थवाहस्य नन्दिनी ॥ २४ ॥
एषा जिनमतीनाम्नी यथा नारीशिरोमणिः ।
तथा त्वमपि रूपाद्यैर्गुणैर्नरशिरोमणिः ॥ २५ ॥
करोति गृहवासेन संयोगं युवयोर्यदि ।

वेधास्तत्तस्य निर्माणप्रयासः सफलो भवेत् ॥ २६ ॥
जिनदत्तोऽभ्यधाद् युक्तं न युष्माभिर्विधीयते ।
वयस्या यत् कृतं हास्यमिह स्थाने मया सह ॥ २७ ॥
पराभिप्रायविज्ञानदक्षा अप्यनुगामिनः ।
किं न जानीत मां यूयं दीक्षाऽऽदानकृताशयम् ॥ २८ ॥
मुखमण्डनविज्ञानकौतुकेन मयाऽपि भोः ! ? ।
पृष्टमेतदन्यथा तु स्त्रीकथायां न युज्यते ॥ २९ ॥
इत्युदित्वा स्थितः सोऽथ जिनमत्या निरीक्षितः ।
अनुरागश्च संजातस्तस्यास्तस्मिन् शुभाकृतौ ॥ ३० ॥
ज्ञातः सखीजनेनाऽस्या अभिप्रायो मनोगतः ।
संप्राप्तेन गृहं सोऽथ पित्रोरग्रे निवेदितः ॥ ३१ ॥
जिनदत्तोऽपि सदनं गत्वा कृत्वा च भोजनम् ।
हट्टे गत्वा व्यवहृतिं चक्रेऽर्थार्जनहेतवे ॥ ३२ ॥
जिनमत्याः पिता गत्वा जिनदासस्य सन्निधौ ।
कन्याप्रदानं विदधेऽनुमेने सोऽपि तन्मुदा ॥ ३३ ॥
गृहप्राप्तस्य वृत्तान्तः पित्रा सूनोर्निवेदितः ।
असौ दीक्षाभिलाषित्वादुद्वाहं नेच्छति स्म च ॥ ३४ ॥
जिनमन्दिरयानादि स्ववृत्तान्तं निवेद्य सः ।
पित्रा पुनर्विवाहार्थे भणितो मौनमाश्रितः ॥ ३५ ॥
अन्यदा कन्यका साऽथ निर्गच्छन्ती गृहाद् निजात् ।
दृष्टा पुरारक्षकेण वसुदत्तेन भोगिना ॥ ३६ ॥
ततो जाताऽनुरागेण तेन गत्वाऽथ तत्पितुः ।

पार्श्वे सा याचिता दत्ता जिनस्येति च सोऽब्रवीत् ॥ ३७ ॥
ततो रुष्टः स दुष्टात्मा मारणात्मिकया धिया ।
संजातो जिनदत्तस्य च्छिद्रान्वेषी दिवानिशम् ॥ ३८ ॥
अश्ववाहिकया राज्ञो गतस्योद्यानमन्यदा ।
पपात कुण्डलं कर्णाच्चलत्यश्वेऽतिरंहसा ॥ ३९ ॥
तच्चागतेन विज्ञातं तेन राजकुले ततः ।
वसुदत्तः समादिष्टस्तदन्वेषण[1]हेतवे ॥ ४० ॥
तदर्थं सोऽचलद्यावत्तावत्तस्य पुरःसरः ।
जिनदत्तो बहिर्गन्तुं प्रवृत्तोऽर्थेन केनचित् ॥ ४१ ॥
दृष्ट्वा तत्कुण्डलं मार्गे सोऽथ दूरमपासरत् ।
लोष्टुवत् परद्रव्याणि यतः पश्यन्ति साधवः ॥ ४२ ॥
वसुदत्तोऽपि तत्रागात् किमेतदिति चिन्तयन् ।
दृष्ट्वादाय च तच्छीघ्रमार्पयच्चावनीपतेः ॥ ४३ ॥
राजा प्रोवाच भो भद्र ! कुतो लब्धमिदं त्वया ।
जिनदत्तान्मया प्राप्तमित्यूचे स च दुष्टधीः ॥ ४४ ॥
जिनदत्तोऽपि किं नाम परद्रव्यं हरत्यहो ! ।
इति पृष्टे नरेन्द्रेण वसुदत्तोऽभ्यधात् पुनः ॥ ४५ ॥
समानो जिनदत्तेन तस्करः कोऽपि नाऽपरः ।
यः सदा पश्यतोऽप्यर्थं परस्मादु हरति प्रभो ! ॥ ४६ ॥
वध्य आज्ञापितो राज्ञा ततोऽयं क्रुद्धचेतसा ।
वसुदत्तोऽपि बद्ध्वा तं रासभारोपितं व्यधात् ॥ ४७ ॥

---

(१) ङ ज-कर्म्मणि ।

रक्तचन्दनलिप्ताङ्गो रसद्विरसडिण्डिमः ।
नीयमानः पुरीमध्ये कृतहाहारवो जनैः ॥ ४८ ॥
गृहान्निर्गतया सोऽथ जिनमत्याऽवलोकितः ।
सा चैवं चिन्तयामास रुदती निभृतस्वरम् ॥४९॥ (युग्मम्)
धर्मार्थी सदयो देवगुरुभक्तिपरायणः ।
निरागो जिनदत्तो ही प्राप्तवान् कीदृशीं दशाम् ? ॥५०॥
दृष्ट्वा तां जिनदत्तोऽपि निर्व्याजस्नेहवत्सलाम् ।
सद्योऽनुरागवशगश्चिन्तयामास मानसे ॥ ५१ ॥
अहो ! अकृत्रिमा प्रीतिः काऽप्यस्या मयि वर्तते ।
दृष्ट्वा मद्व्यसनं दुःखभागिनी याऽभवत् क्षणात् ॥ ५२ ॥
एतस्माद् व्यसनान्मोक्षो भविष्यति ममाऽद्य चेत् ।
कियत्कालं ततो भोगान् भोक्ष्येऽहमनया सह ॥ ५३ ॥
अन्यथाऽनशनं मेऽस्तु सागारमिति चिन्तयन् ।
वध्यस्थाने स आरक्षनरैर्नीतो दुराशयैः ॥ ५४ ॥
प्रियमित्रस्य पुत्री सा कन्यका कृतनिश्चया ।
कायोत्सर्गं व्यधाद्गेहचैत्ये गत्वा मनस्विनी ॥ ५५ ॥
चेतसाऽचिन्तयच्चैवं मातः ! शासनदेवते ! ।
जिनस्य कुरु सान्निध्यं यद्यहं जैनशासनी ॥ ५६ ॥
तस्यास्तस्य च शीलेन तुष्टा शासनदेवता ।
बभञ्ज शूलिकां सद्यो वारांस्त्रींस्तृणमात्रवत् ॥ ५७ ॥
स चोद्वस्ततो वृक्षे रज्जुश्छिन्ना झटित्यपि ।
कृताः खड्गप्रहाराश्च जज्ञिरे कुसुमस्रजः ॥ ५८ ॥

आरक्षकनरास्तस्य दृष्ट्वाऽतिशयमीदृशम् ।
विस्मिताः कथयन्ति स्म तमागत्य महीभुजः ॥ ५९ ॥
भयविस्मयसंपूर्णः स गत्वा तत्र सत्वरम् ।
जिनदत्तं गजारूढमानिनाय निजौकसि ॥ ६० ॥
पृष्टोऽथ सर्ववृत्तान्तं जिनस्तस्य न्यवेदयत् ।
रक्षति स्मारक्षकं च मृत्योर्जीवदयापरः ॥ ६१ ॥
अनुज्ञातस्ततो राज्ञा निजगेहमगादसौ ।
पित्रादिस्वजनस्तस्य सर्वोऽपि मुमुदेतराम् ॥ ६२ ॥
आगत्य प्रियमित्रेण जिनदत्तस्य धीमतः ।
वार्ताचख्ये स्वनन्दिन्या देवताराधनादिका ॥ ६३ ॥
ततस्तुष्टो विशेषेण स तां जिनमतीं सतीम् ।
पर्यणैषीत्सुमुहूर्त्ते महोत्सवपुरःसरम् ॥ ६४ ॥
भुक्त्वा भोगांस्ततः कालं कियन्तमनया सह ।
प्रवव्राज विरक्तात्मा सुस्थिताचार्यसंनिधौ ॥ ६५ ॥
पालयित्वा चिरं दीक्षां खड्गधारासमामिमौ ।
विपद्यान्ते समाधानपरौ त्रिदिवमीयतुः ॥ ६६ ॥

॥ परद्रव्यापहारविरतौ जिनदत्तकथा ॥

औदारिकं वैक्रियकं द्विविधं मैथुनव्रतम् ।
तिर्यङ्मनुष्यभेदेनौदारिकं तु द्विधा भवेत् ॥ ६७ ॥
विज्ञेयं वैक्रियं चैकविधं देवाङ्गना[1]गतम् ।
एतद्व्रतं समस्तानां व्रतानामपि दुःसहम् ॥ ६८ ॥

(१) ऽऽदिकम् ।

परदारप्रसक्तानां दुःखानि स्युरनेकधा ।
यथा करालपिङ्गोऽभूत्पुरोधा दुःखभाजनम् ॥ ६९ ॥
कोऽसौ करालपिङ्गाख्य इति चक्रायुधेन तु ।
पृष्टो जगाद भगवानुर्वीश ! श्रूयतामिति ॥ ७० ॥
अस्तीह भरतक्षेत्रे पुरं नलपुराऽभिधम् ।
बभूव नलपुत्राख्यस्तत्र राजा महाभुजः ॥ ७१ ॥
करालपिङ्गो नाम्नाऽभूत्तस्याऽभीष्टः पुरोहितः ।
शान्तिकर्मणि निष्णातो रूपयौवनवित्तवान् ॥ ७२ ॥
महेभ्यतनयस्तत्र पुष्पदेवोऽभिधानतः ।
मित्रं पुरोहितस्याऽस्य वसति स्म वणिग्वरः ॥ ७३ ॥
तस्यासीत् प्रवरा भार्या पद्मश्रीः प्राणवल्लभा ।
पतिव्रताप्रभृतिभिः स्त्रीगुणैः समलंकृता ॥ ७४ ॥
पुरोधसाऽन्यदा तेन केनचिद्धितकर्मणा ।
तोषितः पृथिवीपालस्ततः सोऽस्मै ददौ वरम् ॥ ७५ ॥
विषयासक्तचित्तेन तेनेदं याचितं ततः ।
पुरेऽस्मिन् स्वेच्छया रामा रमणीया मया प्रभो ! ॥ ७६ ॥
राजा प्रोवाच या काचिदिच्छति त्वामिहाऽबला ।
सेवनीया त्वया सा हि सर्वदा नाऽपरा पुनः ॥ ७७ ॥
अनिच्छन्तीं च चेद्रामां रंस्यसे वाऽर्थयिष्यसि ।
करिष्यामि ततो दण्डं पारदारिकवत् तव ॥ ७८ ॥
स्वैरं संचरता तेन पुरे तस्मिन् पुरोधसा ।
वल्लभा पुष्पदेवस्य पद्मश्रीर्वीक्षिताऽन्यदा ॥ ७९ ॥

ततो विद्युल्लतानाम्नीं तस्या दासीं जजल्प सः ।
भद्रे ! भण तथेमां त्वं यथा वाञ्छति मामसौ ॥ ८० ॥
सतीत्वं पालयन्ती सा नेच्छत्येनं कथञ्चन ।
स्वयं करालपिङ्गेन रन्तुमभ्यर्थिताऽन्यदा ॥ ८१ ॥
साऽवादीन्मेदृशं ब्रूहि न्यास्यत्येतत्सखा तव ।
सोऽब्रवीच्च तथा कार्यं यथाऽन्यत्र प्रयात्यसौ ॥ ८२ ॥
कथितं निजकान्तस्य तद्दाक्यमखिलं तया ।
प्रतीक्षमाणः कालं च सोऽस्थाद् धृत्वा मनस्यदः ॥ ८३ ॥
पुरोहितेन तेनाऽथ विद्यासामर्थ्यतोऽन्यदा ।
कृता दुर्विषहा शीर्षे वेदना मेदिनीपतेः ॥ ८४ ॥
तमाकार्य ततो राज्ञा तत्स्वरूपं निवेदितम् ।
अपनिन्ये सका तेन शिरोऽर्तिर्मन्त्रवादिना ॥ ८५ ॥
पुनस्तुष्टोऽस्य भूपालोऽवदद्याचस्व किञ्चन ।
तेनाऽपि जल्पितं देव ! कुर्विदं त्वं वचो मम ॥ ८६ ॥
किंजल्पिसंज्ञके द्वीपे सन्ति किंजल्पिकाः खगाः ।
सुस्वरा दृश्यमानाश्च भवन्ति सुखदा हि ते ॥ ८७ ॥
तेषामानयनार्थं तत् पुष्पः संप्रेष्यतां वणिक् ।
तदङ्गीकृत्य भूपोऽपि तदर्थं विससर्ज तम् ॥ ८८ ॥
सौवस्तिककृतं चैतत्सोऽपि विज्ञाय बुद्धिमान् ।
भर्तुः प्रमाणमादेश इत्युक्त्वा च ययौ गृहम् ॥ ८९ ॥
अकारयद्भूमिगृहं गृहस्यान्तस्ततश्च सः ।
नरैः प्रत्ययितैर्यन्त्रपर्यङ्कं तस्य चोपरि ॥ ९० ॥

	Rs.	
*Nirukta, (2nd Edition) Vol. I. Fasc. 1 @ Rs. 1-4 ...		1 4
*Nyāyavārtika, Fasc. 2–6 @ /10/ each		3 2
Nityācārapaddhatiḥ, Fasc. 1–7 @ /10/ each		4 6
Nityācārapradīpa Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-4. @ /10/ each ...		7 8
Nyayabinduṭīkā, Fasc. 1 @ /10/ each		0 10
*Nyāya Kusumāñjali Prakaraṇa Vol. II, Fasc.1–3 @ /10/ each ...		1 14
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each		1 4
Nyayasarah		2 0
Padumawati, Fasc. 1–6 @ 2/ each		10 0
Prākrita-Paingalam, Fasc. 1–7 @ /10/ each		4 6
Parāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1–6 ; Vol III, Fasc. 1–6 @ /10/ each		11 14
Parāçara, Institutes of (English) @ 1/- each		1 0
Pariksamukha Sutram		1 0
Prabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each		3 12
Rasarnavam, Fasc. 1-3		3 12
Ravisiddhanta Manjari, Fasc. 1		0 10
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each		1 4
Samaraicca Kaha Fasc. 1-5, @ /10/ each		3 2
Sāṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each		2 8
Ditto (English) Fasc. 1–3 @ 1/- each		3 0
Six Buddhist Nyaya Tracts.		0 10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each		3 12
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ 1/- each		1 0
Suddhikaumudī, Fasc 1-4 @ /10/ each		2 8
Sundaranandam Kavyam		1 0
Suryya Siddhanta Fasc. 1-2 @ 1-4 each		2 8
Syainika Sastra		1 0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each		9 6
*Taittirīya Saṁhitā, Fasc. 27–45 @ /10/ each		11 14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each		6 4
Tantra Vārteka (English) Fasc. 1-10 @ 1/4/ each		12 8
*Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc, 1-6; Vol. II, Fc, 1, @ /10/ each	4	6
Tattva Cintamani Didhiti Prakas, Fasc. 1-5, @ /10/ each	3	2
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, Fasc, 1-3, @ /10/ each	1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1–5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1–6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3–6 ; Vol. II, Fasc. 1–7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-5 @ 1/4/	5	0
Vivādaratnākara, Fasc. 1–7 @ /10/ each	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/ each	3	12
Yogasāstra Fasc. 1-3	3	12

Tibetan Series.

Amarkosha	2	0
Baudhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1–4 @ 1/- each ...	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiṅ, Fasc. 1–4 @ 1/- each	4	0
Rtogs *brjod dpag bkhri* S'iṅ (Tib. & Sans. Avadāña Kalpalatā Vol. I, Fasc. 1–10 ; Vol. II. Fasc. 1–10 @ 1/- each	20	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0

Arabic and Persian Series.

Ámal-i-Salih, or Shan Jahan Namah	2	0
Al-Muqaddasi (English) Vol. I, Fasc. 1–4 @ 1/- each	4	0
Ain-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	22	0
Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each	55	8
Akbarnāmah, English Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–7, Vol. III, Fasc. 1–2 @ 1/4/ each	21	4
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each ... ... Rs. 3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each 31 8
Faras Nama, of Hashini 1 0
Ditto of Zabardast Khan 1 0
Farnang-i-Rashīdi, Fasc. 1–14 @ 1/8/ each 21 0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ... 4 0
Gulriz 2 0
Hadiqatu'L, Haqiqat, (Text & Eng.) 3 8
History of Gujarat 1 0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ... 0 12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each 7 8
Iqālnamah-i-Jahāngirī. Fasc. 1--3 @ /10/ each 1 14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51 0
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1--8 @ 2/ each 6 0
Maa'ṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each 35 0
Ditto (Eng) Vol. I, Fasc. 1--2, @ 1/4/ each 2 8
Memoirs of Tahmasp 1 0
Marhamu 'L-Ilali 'L-Mu'Dila Fasc. 1--2 ... ... 2 0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each 9 6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each ... 36 0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each 11 14
Ditto Part 3, Fasc. 1--2 @ 1/- each 1 0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 0 10
Nizāmi's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each 1 8
Persian and Turki Divans of Bayram Khan, Khan Khanan 1 0
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott 5 0
Riyāzu-s-Salātīn, Fasc. 1--5 @ /10/ each 3 2
Ditto (English) Fasc. 1--5 @ 1/ 5 0
Shah Alam Nama 1 14
Taḏhkira-i-khushnavīsān 1 0
Tubaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each 14 0
Ditto Index 1 0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1--7 @ /10/ each .. 4 6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ... 3 12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each 3 0
The Mabani 'L Lughat : A Grammar of the Turki Language in Persian 1 8
Tuzuk-i-Jahāngirī, (Eng) Fasc. 1 @ 1/ 1 0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each 3 2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each 10 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XX @ 10/ each 20 0
2. Proceedings of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No.
3. Journal of the Assiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7). 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmīraçabdāmṛta, Parts 1 & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N. B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P. 17-7-14

BL
1373
S45A6
1909
v.4

Ajita Prabhācārya
Shāntināthacaritram

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 15 02 15 07 022 6